Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA 1949 G.K.V.

111127
Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111127

श्रीशिवः शरणम्

४र्थ-वर्षे संख्या १

मञ्जूषा

111127

संस्कृतभाषामयी मासिक पत्रिका

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

If you want to learn Sanskrit without tears, if you want to get acquainted with all that is best in Sanskrit literature and Indian culture, if you want to keep abreast of Indological research, you must subscribe to the MANJUSHA. The commentary on the Uṣī-hymns, the Gāthās with Sanskrit translation, the Mahābhāṣya with English translation and notes, ancient inscriptions, Notes and Queries, letters in Sanskrit, proverbs and maxims from the different Indian and European languages are some of the special features of the MANJUSHA. The annual subscription is Rupees Six only. We are confident that scholars will like the Mañjūshā and help it along by subscribing to it for themselves, for their students, and for any institutions with which they may be connected.

Office : 81 Shyambazar Street, Calcutta—4

Annual Subscription Rupees Six only.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्।

२। प्रतिसौरमासं दशम दिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषा प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते; तृतीये भागे सानुवादाः पारसीकानां गाथाः, साङ्लानुवादं महाभाष्यम्, सभाष्यश्च ऋग्वेदो मुद्र्यन्ते।

४। सनातन-भारतधर्म-विरुद्धाः प्रबन्धाः कथञ्चित्तदपि न प्रकाश्येरन्।

५। आपाततः प्रतिमासं द्वात्रिंशत्-पृष्ठात्मिका मञ्जूषा प्रकाश्यते, सति ग्राहकाणां बाहुल्ये पञ्चाशत्-पृष्ठात्मिकापि प्रकाश्येत।

६। एषा प्रथमा संख्याल्पीयसैव कालेन मुद्रितेति सम्यक् शोधनाभावात् कदाचिदत्र सावशेषत्वं प्रमादानां स्यात्, तत् क्षम्यतां सहृदयैः। द्वित्रैरेव च मासैः शोधनादीनां समीचीना व्यवस्था भविष्यति।

श्रीविश्वनाथ चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४।

81, Shyambazar Street, Calcutta 4.

Phone: B. B. 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषा

September, 1949	१८७१-शाकीयाश्विनस्य ४र्थ-वर्षस्य १म-संख्या	Vol. IV No. 1

मङ्गलाचरणम्

श्रीगणेशाय नमः ।

जय शङ्कर पार्वतीपते मृड शम्भो शशिखण्डमण्डन ।
मदनान्तक भक्तवत्सल प्रियकैलास दयासुधाम्बुधे ॥ १ ॥

सदुपायकथास्वपण्डितो हृदये दुःखशरेण खण्डितः ।
शशिखण्डशिखण्डमण्डनं शरणं यामि शरण्यमीश्वरम् ॥ २ ॥

महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे ।
दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः ॥ ३ ॥

न वयं तव चर्मचक्षुषा पदवीमप्युपवीक्षितुं क्षमाः ।
कृपयाऽभयदेन चक्षुषा सकलेनेश विलोकयाशु नः ॥ ४ ॥

त्वदनुस्मृतिरेव पावनी स्तुतियुक्ता न हि वक्तुमीश सा ।
मधुरं हि पयः स्वभावतो ननु कीदृक् सितशर्करान्वितम् ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सविषोऽप्यमृतायते भवाञ्छवमुण्डाभरणोऽपि पावनः ।
भव एव भवान्तकः सतां समदृष्टिर्विषमेक्षणोऽपि सन् ॥ ६ ॥

अपि शूलधरो निरामयो दृढवैराग्यरतोऽपि रागवान् ।
अपि भैक्षचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥ ७ ॥

वितरत्यभिवाञ्छितं दृशा परिदृष्टः किल कल्पपादपः ।
हृदये स्मृत एव धीमते नमतेऽभीष्टफलप्रदो भवान् ॥ ८ ॥

सहसैव भुजङ्गपाशवान् विनिगृह्णाति न यावदन्तकः ।
अभयं कुरु तावदाशु मे गतजीवस्य पुनः किमौषधैः ॥ ९ ॥

सविषैरिव भीमपन्नगैर्विषयैरेभिरलं परिक्षतम् ।
अमृतैरिव सम्भ्रमेण मामभिषिञ्चाशु दयावलोकनैः ॥ १० ॥

मुनयो बहवोऽद्य धन्यतां गमिताः स्वाभिमतार्थदर्शिनः ।
करुणाकर येन तेन मामवसन्नं ननु पश्य चक्षुषा ॥ ११ ॥

प्रणमाम्यथ यामि चापरं शरणं कं कृपणाभयप्रदम् ।
विरहीव विभो प्रियामयं परिपश्यामि भवन्मयं जगत् ॥ १२ ॥

बहवो भवताऽनुकम्पिताः किमितीशान न माऽनुकम्पसे ।
दधता किमु मन्दराचलं परमाणुः कमठेन दुर्धरः ॥ १३ ॥

अशुचिं यदि माऽनुमन्यसे किमिदं मूर्ध्नि कपालदाम ते ।
उत शाठ्यमसाधुसङ्गिनं विषलक्ष्माऽसि न किं द्विजिह्वधृक् ॥ १४ ॥

क्व दृशं विदधामि किं करोम्यनुतिष्ठामि कथं भयाकुलः ।
क्व नु तिष्ठसि रक्ष रक्ष मामयि शम्भो शरणागतोऽस्मि ते ॥ १५ ॥

विलुठाम्यवनौ किमाकुलः किमुरो हन्मि शिरश्छिनद्मि वा ।
किमु रोदिमि रारटीमि किं कृपणं मां न यदीक्षसे प्रभो ॥ १६ ॥

शिव सर्वग शर्व शर्मदं प्रणतो देव दयां कुरुष्व मे ।
नम ईश्वर नाथ दिक्पते पुनरेवेश नमो नमोऽस्तु ते ॥ १७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥ १८ ॥
उपमन्युकृतं स्तवोत्तमं जपतः शम्भुसमीपवर्त्तिनः ।
अभिवाञ्छितभाग्यसम्पदः परमायुः प्रददाति शङ्करः ॥ १९ ॥
उपमन्युकृतं स्तवोत्तमं प्रजपेद् यस्तु शिवस्य सन्निधौ ।
शिवलोकमवाप्य सोऽचिरात् सह तेनैव शिवेन मोदते ॥ २० ॥

इत्युपमन्युकृतं शिवस्तोत्रं सम्पूर्णम् ।

शमो दमश्च

(भामतीतः)

रागादिकषायमदिरामत्तं हि मनस्तेषु तेषु विषयेषूच्चावचम् इन्द्रियाणि प्रवर्त्तयत्, विविधाश्च प्रवृत्तीः पुण्यापुण्यफला भावयत् पुरुषम् अतिघोरे विविधदुःखज्वालाजटिले संसारहुतभुजि जुहोति । प्रसंख्यानाभ्यास-लब्ध-वैराग्य-परिपाक-भग्न-रागादि- कषाय-मदिरा-मदं तु मनः पुरुषेणावजीयते वशीक्रियते । सोऽयमस्य वैराग्यहेतुको मनोविजयः शम इति वशीकारसंज्ञ इति चाख्यायते। विजितं च मनस्तत्त्वविषयविनियोगयोग्यतां नीयते, सेयमस्य योग्यता दमः । यथा क्षान्तोऽयं वृषभयुवा हलशकटादिवहनयोग्यः कृत इति गम्यते ।

सुभाषितानि

न चोरहार्या न च राजहार्या न भ्रातृहार्या न च बन्धुहार्या ।
स्वदेशमित्रं परदेशबन्धुर्विद्या-सुधा यां पुरुषाः पिबन्ति ॥

प्रसङ्गाभरणम् ।

न चौरहार्यं न च राजहार्यं विदेशयाने न च भारकारि ।
एतद्धनं सर्वधनप्रधानं विद्याधनं यत् पुरुषा वहन्ति ॥

सुभाषितार्णवः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"न तथा रिपुर्न शस्त्रं न विषं न हि दारुणो महाव्याधिः ।
उद्वेजयन्ति पुरुषं यथा हि कटुकाक्षरा वाणी ॥
"न तथा शशी न सलिलं न चन्दनरसो न शीतलच्छाया ।
प्रह्लादयन्ति पुरुषं यथा हि मधुराक्षरा वाणी ॥"

सुभाषितार्णवः ।

त्यक्त्वापि निजप्राणान् परसुखविघ्नं खलः करोत्येव ।
निपत्य कवले सद्यो वामयति मक्षिका भोक्तारम् ॥

सुभाषितार्णवः ।

तृष्णे देवि नमस्तुभ्यं धैर्यविप्लवकारिणि ।
विष्णुस्त्रैलोक्यनाथोऽपि यत् त्वया वामनीकृतः ॥

शार्ङ्गधरपद्धतिः ।

लक्ष्मीर्वेश्मनि भारती च वदने शौर्यं च दोष्णोर्युगे
त्यागः पाणितले सुधीश्च हृदये सौभाग्यशोभा तनौ ।
कीर्त्तिर्दिक्षु सपक्षता गुणिजने यस्माद् भवेदङ्गिनां
सोऽयं वाञ्छितमङ्गलावलिकृते धर्मः समासेव्यताम् ।

सुभाषितार्णवः ।

व्ययशीलः कुबेरोऽपि कामं याति दरिद्रताम् ।
अपि प्राणाः प्रदातव्या नार्थिभ्यो धनिकैर्धनम् ॥

धूर्तसमागमः ।

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

पञ्चतन्त्रम् ३।१०३

आभाणकमाला

१ । (ब) गाङेर मध्ये ढेउ देखे नौका डुवाय कूले ।
दृष्ट्वा तरङ्गं मध्येगङ्गं नावं मज्जयति कूले ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२। (व) अराँधुनीर हाते प'ड़े रुइ माछ काँदे।
ना जानि राँधुनी मोरे केमन करे राँधे॥

पतितोऽपाचिकापाणौ रोदिति रोहितो झषः।
न जाने पाचिकेयं मां कथं वा रन्धयिष्यति॥

३। (व) घरे आगुन दिया उगिर तले पलाय।
गृहे दत्त्वानलं मूढो मञ्चाधस्तात् पलायते।

४। (फ) Une hirondelle ne fait pas le printemps.

(श) Eine Schwalbe macht keinen Sommer.
One swallow does not make a summer.

(ग) Mia khelidōn ear ou poiei. One swallow does not make spring.

एककश्चातको लोके न वर्षासूचने प्रभुः।

५। There's many a slip between the cup and the lip.

(ग) Polla metaxu pelei kulikos kai kheileos akron.

(ला) Inter calicem et os multa cadunt.

वर्तन्ते बहवो विघ्ना मुखं भाजनमन्तरा।

(व) वाड़ा भाते विघ्न घटे।
परिवेषितभक्तेऽपि प्रत्यूहो जायते क्वचित्।

(ला) Saepe inter buccam
contingit casus, et offam.

(व) वङ्गीयः। (श) शर्मण्यः। (ला) लाटिनः। (ग) ग्रीकः। (फ) फरासीयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथासरित्सागरे हास्यकथा

[निबन्धकः—वि अनन्ताचार्यः]

कस्मिंश्चित् ग्रामे मूर्खाः चण्डालाः आसन्। ते कदाचित् महिषमांसलोलुपाः ग्रामीणस्य कस्यचित् वैश्यस्य महिषं चौर्येण नीत्वा ग्रामात् बहिः विशस्य अभक्षयन्। महिषस्वामी राज्ञे निवेदयामास। राजा तान् मूर्खान् आनाय्य अपृच्छत्—किमस्य वैश्यस्य महिषः खादितो भवद्भिः? न वा? इति। वृद्धः मूर्खः अब्रवीत्—न वयं जानीमः महिषम्, न वयम् अचोरयाम, नापि अभक्षयाम इति। तत् श्रुत्वा महिषस्वामी अपृच्छत्—अस्माकं ग्रामे, पूर्वस्यां दिशि, तटाकतीरे, गते शुक्रवासरे, प्रातः युष्माभिः संभूय, महिषो मदीयः भक्षितो न किम्? इति। अथ वृद्धः प्राह—देव! राजन्! अनेन वैश्येन उक्तं सर्वम् असत्यमेव। अस्माकं ग्रामे पूर्वा दिक् नास्ति, तटाकतीरं नास्ति, शुक्रवासरः नास्ति, प्रातरपि नास्ति इति। तदाकर्ण्य सर्वेऽपि जहसुः। तत् श्रुत्वा राजा ससान्त्वं प्राह—भो वृद्ध! त्वं साधुरसि, सत्यवादी चासि, उच्यतां कस्ते पिता? इति। वृद्धः प्राह—पितर्युपरते वर्षत्रयात् परं जातोऽस्मि, न जाने तत् इति। राजा—भवतु तत्सर्वम्। कथं सर्वं त्वम् अपलपसि? तत् न न्याय्यम्। अहं जाने त्वं सत्यवादीति। ब्रूहि—वैश्येनानेन उक्तेषु विषयेषु एकमपि तथ्यं वर्तते वा न वा? इति। वृद्धः—देव! महिषो भक्षित इति सत्यम्, अन्यत्सर्वं मिथ्या इति।

अथ राजा मूर्खाणां सकाशात् महिषस्य मूल्यं वैश्याय दापयित्वा तान् विससर्ज।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जकोन्दा

[निबन्धिका—सौभाग्यवती क्षमा देवी]

[श्रूयते खलु दनन्झियो नाम प्रसिद्धिमान् इतालीदेशजः कविराधुनिकः। तेन बहूनि नाटकानि रसालङ्कारपरिप्लुतानि प्रणीतानि किल दृश्यन्ते। तेषु जकोन्दानाम पञ्चाङ्कं नाटकमनेक-लोकोत्तरगुणप्रविशिष्टतया सहृदयानां हृदयमावर्जयतितराम्। तत्र चरमाङ्कस्य सामग्रीमुपजीव्य रसभावरीतिगुणालङ्कारध्वनिभेदान्कति-चिदुदाहर्तुं मया श्लोकानामियं पञ्चदशी समुपनिबद्धा विदुषां मुदे भूयादित्याशास्यते।]

चमत्कर्तुकामा पतिं पुण्यशीला
जकोन्दास्य सायं गता शिल्पशालाम्।
निलीयोपविष्टा बहिर्जोषमेकं
प्रचिक्षेप वातायनान्तः शिरीषम्॥ १॥

अलब्धोत्तरा मन्दमुत्थाय तन्वी
विनोदाय कुत्रापि गूढः पतिः स्यात्।
इति स्मेरवक्त्राऽविशल्लोलनेत्रा
सकम्पाऽग्रपादाञ्चिता कुञ्चिताङ्गी॥ २॥

स्थिता द्वारि किञ्चित्प्रकोष्ठस्य पत्युः
पुरेव प्रिया स्यामिति ध्यानमग्ना।
अभूद्दर्पणेऽन्तर्निजं वीक्ष्य बिम्बं
करस्वस्तिकच्छन्नवक्षोजवक्त्रा॥ ३॥

क्षणादुन्मुखी सा दृशं यावदन्त-
र्न्यधात्तावदासीन्नु पातालमग्ना।
बभौ नेव यत्साश्रुविस्फारिताक्षी
हृतालापशक्तिर्विधातव्यमूढा॥ ४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा हि प्रियं सा ददर्शाङ्कलग्नां
भुजग्रन्थिबद्धामुपासीनमन्याम् ।
पुरस्तस्य गुर्वी शिलामूर्त्तिरेका
विरेजेऽन्तिके नव्यकान्ताप्रतीका ॥ ५ ॥

नियम्य प्रगल्भा निजक्षोभमीष-
द्विकारं न कश्चिद्बहिर्दर्शयन्ती ।
विवेश प्रकोष्ठं लसद्दिव्यमाला-
कुलेन्दिन्दिरालिः शनैरिन्दिरेव ॥ ६ ॥

प्रियाश्लेषबन्धाद्विमुक्ताय पत्ये
झटित्युद्गताय स्रजं सा व्यतारीत् ।
ततश्चान्धकारात् परामङ्गनां ता-
मनालोकयन्तीव नाथं जगाद ॥ ७ ॥

विधातुः प्रयत्नेऽनुरूपस्वरूपं
विलोक्याद्भुतं नाथ पाषाणमूर्तेः ।
कियन्नाम तद्रूपसंवादि शीलं
भवेद्बिम्बभूतस्त्रिया इत्यचिन्त्यम् ॥ ८ ॥

स्वतन्त्रापरस्त्रीं तिरोधाय तूर्णं
वधूं सान्त्वयिष्यन् पुरःपाणिरासीत् ।
निवृत्य क्षणात् सा परागञ्चितास्या
बभूवाथ धृष्टः स तामित्युवाच ॥ ९ ॥

क्व नैसर्गिकं ते प्रिये कान्तरूपं
क्व निर्जीवमूर्तेरविज्ञातवध्वाः ।
क्व पातिव्रती ते क्व लीलाऽपरासां
स्वकीया स्वकीया परोढा परोढा ॥ १०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निशम्याथ गेहं गता भूषणानि
व्यपास्याभवन्नित्यकार्यप्रसक्ता ।
निशि स्वामिनाभ्यर्थितापि स्वमच्चं
जहौ कन्ययाशेत यामद्वयं च ॥ ११ ॥
अथ क्षोभजालाकुलात्मान्तरङ्गा
निजस्वास्थ्यगम्भीरभावादपेता ।
तमोनीलवासाः स्फुरद्घर्घरान्तः
स्रवन्ती द्रुतं शिल्पशालां विवेश ॥ १२ ॥
विभज्य तं विग्रहमुग्रहस्ता
तद्ध्वंशविभ्रंशितबाहुयुग्मा ।
शरावतीवोद्धुरविद्धवीचिः
पपात हा हन्त विरूपिताङ्गी ॥ १३ ॥

... ...

कदाचिद्गवाक्षे सुदृश्यास्यपद्मां
विलोक्याङ्गनात्तामृजुर्बालकन्या ।
कराभ्यामुपादाय चुम्बाम्ब मां मा-
मिति प्रार्थयामास वृत्तानभिज्ञा ॥ १४ ॥
अधः संनिधौ बालिकामुद्भुजांता-
मभूदक्षमा चुम्बितुं मन्दभागा ।
गलद्बाष्पदृग्भ्यां पिबन्ती तु वत्सां
कथञ्चिद्विविक्तं व्यधादात्मचित्तम् ॥ १५ ॥

आख्यानमाला

औत्तराधर्यम्

"अपि नाम सर्वतः प्रसर्पिणा दारिद्र्येण महार्घ्यतया क्लिष्टोऽसि ?"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अथ किम्। मया तावत् सहधर्मिणी पित्रालयं प्रेषिता, त्रयः पुत्रा अनाथालये स्थापिताः, शुनकश्च विक्रीतः।"

"अहो! नितरां दुःखाकरोऽयं वृत्तान्तः।"

"बाढम्। इतोऽपि चेत् कष्टमापतेत्, धूमशकटमपि गत्यन्तराभावाद् विक्रेतव्यं स्यात्।"

व्यसनम्

चतुरङ्गक्रीडाव्यसनी कश्चन वृद्धः स्वसब्रह्मचारिणा तरुणेन साकं क्रीड़न् स्थितः। ततश्चार्द्धरात्रे यावत् प्रयास्यन् वृद्धमामन्त्रयते तावत्तेनोक्तम्—"अहो! अद्य तावन्महानुत्सवः समजनि।" यूनोक्तम्—"अथ किम्।" ततः स्थविरेण पृष्टम्, "अपि नाम श्वोऽपि भवानागन्तुं प्रभविष्यति?" तरुणेन च चिरं विचिन्त्योक्तम्—"भवतु। श्वस्ताघन्मे विवाहो भवितेति निर्णीतमासीत्। परं दिनान्तरे तद् भविष्यति। अहमागमिष्याम्येव।"

बालस्य बुद्धिवैभवम्।

विद्यालयपरिदर्शकेन जडमतिपुरीस्थं शिशुविद्यालयं सम्प्राप्य मन्दमतिर्नामच्छात्रः पृष्टः—संवत्सरे कति दिनानि वर्त्तन्ते इति। मन्दमतिना सप्रश्रयमुक्तम्—सप्त। ततश्च प्रशान्तिम् उपगते सतीर्थ्यानां मृदुहसिते, परिदर्शकेन गर्जितम्—मया खलु संवत्सर इत्युक्तं न तु सप्ताह इति। पुनरप्युच्यताम्—संवत्सरे कति दिनानि वर्त्तन्ते?

मन्दमतिश्च मुहूर्त्तं प्रतिपत्तिमूढ इवावस्थाय तारस्वरेण प्रोवाच, रविवासरः, सोमवासरः, मङ्गलवासरः, बुधवासरः, बृहस्पतिवासरः, शुक्रवासरः, शनिवासरः। अपरेऽपि वर्त्तन्ते चेद् वर्त्तन्तां नाम, मया पुनः कदापि तेषां नामानि नाकर्णितानि। श्रीक्षितीशचन्द्रशर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्ययकुण्ठः पितामहः

[निबन्धकः—श्रीउपेन्द्रमोहनसांख्यतीर्थः]

पितामहः। (सद्यः स्वगृहे वैद्युतालोकं व्यवस्थाप्य परिजनान् प्रति) हंहो परिजनाः, सावधानं शृणुत मे वचनम्। इयं वैद्युतवर्तिका बहुव्ययसाध्या न तैलवर्तिकेव सर्वदा प्रज्वलनीया श्रीमद्भिः। सुधाधवलानां बृहत्प्रकोष्ठानां तैलवर्त्युत्थमसीलेपपरिजिहीर्षयैव केवलं मयेयं सन्नद्धा। अपरञ्च, तैलवर्तिका यथेच्छं प्रज्वलयितुं निर्वापयितुं वा न शक्यते। यतस्तस्य प्रज्वलने महान् आयासोऽरणिकाष्ठानां व्ययबाहुल्यञ्च सम्पद्येते। अरणिकाष्ठानाञ्चाद्यत्वे षष्टिरेव यष्टिकाः प्रत्याणकं लभ्यन्ते। इत्येवं बहु वितर्क्यैवेयं व्यवस्था मया कृता, परमियं व्यवस्था सर्वात्मना श्रीमतां कृपादृष्टिमपेक्षते। भवतामनुग्रहश्चेत् सर्वमेवेदं प्रवाहेमूत्रितं भविष्यतीति।

एवमनुशिष्यापि स्वजनानसौ कीनाशः शमं नाससाद। कः कदा कुत्राऽऽलोकं ज्वलयतीति विचिन्वान एव कालमतिवाहयति स्म। अन्येद्युश्च रात्रौ कनिष्ठपुत्रगृहं प्राप्तो वर्तिं प्रज्वलितां दृष्ट्वा प्रोवाच, किमिति भोः! विनैव कारणमत्र दीपः प्रज्वल्यते?

(प्रविश्य) कनीयसी स्नुषा। आर्य, नायं निष्कारणो ज्वलति। बालोऽयमालोकमन्तरेण तिष्ठन् बिभेतीति आलोकं प्रज्वल्य कर्मान्तरे गता आसम्।

पितामहः। हा धिक् प्रमादः, बालोऽपि नामाऽऽलोकमन्विष्यति। परं न बालो बालजननी बिभेतीति वक्तव्यम्, मया सर्वं बुध्यते। अस्तु पश्यामि।

(जनहीनं महानसम् प्रविश्य) पितामहः। किमिति भो भवतीनां पाकशालाऽप्यालोकमन्तरेण तिष्ठन्तो बिभेतीत्युच्यताम्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रविश्य) मध्यमा स्नुषा। आर्य, नहि नहि। जनशून्ये गृहे मूषको यथेष्टमनिष्टमाचरतीति तदुत्त्रासनार्थमालोकः प्रज्वलितः। न तावन्निष्पन्नेदानीमपि सर्वेषामाहारादिक्रिया।

पितामहः। किं किम्? मूषकोऽपि नामालोकव्ययेन निराकर्तव्यः स्यात्। श्रीमतीभिः पुनर्यथेष्टं खादन्तीभिः पिबन्तीभिरिहोपविश्य किं क्रियते? बाल आलोकविरहं न सहत इत्यालोकः प्रज्वलयितव्यः, मूषकस्त्वालोकं न सहत इत्यतोऽप्यालोकः प्रज्वलयितव्यः, अन्ततश्च मक्षिकादीनामप्युच्चाटनार्थमालोकः प्रज्वलयितव्य इत्यहो क्वचिदप्ययं निर्वाणं नाधिगच्छेत्। क्रियतां क्रियतां यथारुचि सर्वम्, अलक्ष्मीः स्कन्धे कृतपदैव वर्तते, मया चिन्तयता किं वा कर्तव्यम्।

अन्येद्युरस्य बालः पौत्रः पश्चिमायां यामिन्यां स्नानागारं गच्छन्नालोकं प्रदीपयन् वृद्धेन दृष्टः। वृद्धोऽमुं करेण सबलमाकृष्याह—"अरेरे सम्राट्तनय, किमित्यवसितायामपि सितायां निशीथिन्यामेवमालोकं प्रज्वलयसि? व्ययभारस्तु मयैव वृद्धेन वोढव्यो न पुनस्ते सम्राजा जनकेन। इतः पूर्वमेवं मया स्नानगृहात् प्रत्यावृत्तम्, तदानीमप्यालोको न प्रज्वलितः। (सर्वतः पश्यन्) अत्याहितम् अत्याहितम्! न केवलं स्नानसदने, परमलिन्दे ततः शयनगृहेऽप्यालोको ज्वालितः! एवं हि प्रतिजनं स्नानकर्मणैव केवलमाणकं व्ययितं भविष्यति प्रत्यहम्, प्रतिमासं चाणकद्वयहीनं रूप्यकद्वयम्, दशजनानां पुनरेतत् संहत्य द्वादशाणकोत्तराष्टादशरूप्यकाणि? हुम्! (बालं सबलं स्कन्धे गृहीत्वा) किमित्युरगचरणः प्रत्यक्षीकृतः* श्रीमता, पित्रा ते रजन्यामेव राज्यमवजितं वा?

* यदा केनापि निर्मर्यादमाचर्यते तदा तेन सर्पस्य चरणः सन्दृष्टः, सर्पस्य पादा अवलोकिता इत्यादिकं वङ्गीयैर्भण्यते। अत्र च मूलं रामायणवचनम्—अहिरेव ह्यहेः पादान् विजानाति न संशयः। इति मञ्जूषासम्पादकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालः। (सभयं वेपमानः) मर्षयतु मर्षयत्वार्यः, अनवबुध्यमानेन मयैवमाचरितम्, पुनर्न भविष्यति। परं शयनस्थानस्याऽऽलोको न मया प्रज्वलितः।

पितामहः। कथं त्वया सुशीलेन प्रज्वलयिष्यते ? नियतं दुर्वृत्तेन मया प्रज्वलितः।

बालः। मा मैवम्, परं शयनावसरे तातपादैः पूर्वरात्रे प्रदीपितः स्यादिति तर्कयामि।

पितामहः। तर्हि सर्वरात्रमयमेवमेव ज्वलतीति वक्तव्यम् ? मुषितोऽस्मि भो मुषितोऽस्म्येतैरयथासम्राज्यमानैर्दुर्जातगोष्ठीकैः। नातः परं क्षणमपि विलम्बितुं युक्तम्। एषोऽहं करोम्येतस्य प्रतिविधिम्। (पत्रमाकृष्य विलिखति) श्रीमन्तो विद्युत्प्रवाहसमितेः संचिवमहोदयाः, छिद्यताम् अकालहीनमधःसंकेतितस्य गृहस्य वैद्युतालोकसन्धानसूत्रम् इति निवेदयति श्रीः—। (पौत्रं प्रति) क्रियतामिदानीं यथापूर्वमन्धकारविहारः। अनुचितस्तिलको ललाटे कण्डूतिं जनयति ; इदानीं स्वस्थाः स्वपित।

व्याकरण-विमर्शः

[निबन्धकः —श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सहृदयाः, अवितथं खलूक्तं कविकुलचूडामणिना कालिदासेन—"नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण" इति। न केवलं मनुजानां शब्दानामपि समवस्था कदापि निहीना भवति, कदापि वा समुन्नतिमासादयति। बहोः कालात् पूर्वं कुत्र-शब्दस्य साधुत्वे कस्यापि संशयो नासीत्, ततश्च महर्षिणा पाणिनिना लौकिकसंस्कृतबाह्यत्वमस्य व्यवस्थापितम्, ततश्चामरादिना वेदबाह्येन शुद्धि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादनपुरःसरं भाषाप्रवेशमयं कारितः। विश्रामशब्दस्यापि दशेदृश्येव सन्दृश्यते। तथाहि "नोदात्तोपदेशस्य मान्तस्यानाचमेः" (पाः ७।३।३४) इति सूत्रेण वृद्धिप्रतिषेधात् विश्राम्यतेर्घञि विश्रम इति पदं संसिध्यति। रमधातुरनुदात्तोपदेश इति कृत्वा विपूर्वाद्रमतेर्घञि विराम इति पदं निष्पद्यते। विश्रामविरामयोः प्रायेण समानार्थकत्वात् विरामशब्दस्य दीर्घत्वमसहमानेन क्रमेण विश्रामशब्देनापि दीर्घभावः स्वीकृतः। तत ऊर्ध्वं विश्रामशब्दस्य समधिकप्रचारात् पाणिनीयेनापि चन्द्राचार्येण विश्रमशब्दस्य ह्रस्वत्वं निराकृत्य दीर्घत्वमेव व्यवस्थापितम्। ततश्च प्रायेण पाणिनीयमतानुवर्त्तिनापि जैनेन्द्रेण विश्रामशब्दस्य दीर्घत्वं कथञ्चिद् विसोढम्। ततश्च वैयाकरणैः कालिदासादिमहाकविप्रबन्धेषु विश्रम-विश्रामयोरुभयोरपि सद्भावं संप्रेक्षमाणैः पुनरपि दीर्घविकल्पो विहितः। तथाच प्रयोगाः—

अथवा, अविश्रमोऽयं लोकतन्त्राधिकारः। [शाकुन्तलम् ५।]

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः [मेघदूतम् १।२६]

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।

उत्तररामचरितम्। १।४०

पूर्वं यामं त्रियामायाः प्रयोगेणातिनाम्य तु।
सेव्या शय्या शरीरस्य विश्रामार्थं स्वतन्त्रिणा॥

सौन्दरनन्दः १४।३२

अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात्॥

चाणक्यश्लोकः।

अत्र वल्लभेन विस्पष्टमेवोक्तम्--विश्रामशब्दः कवीनां प्रमादज

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। मल्लिनाथेन पुनरस्य साधुत्वमित्थं समर्थितम्—'विश्रामेत्यत्र "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति पाणिनीये वृद्धिप्रतिषेधेऽपि "विश्रामो वा" इति चान्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धिः' इति। "विश्रामो वा" इति सूत्रं तु चान्द्रव्याकरणे नोपलभ्यते, जैनेन्द्रव्याकरणे पुनः "विश्रमो वा" (५।२।४१) इति सूत्रं जागर्त्येव। तत्र च वृत्तिः— 'विपूर्वस्य श्रमेर्घञि वा ऐप् (= वृद्धिः) न स्यात्' इति।

मुद्रिते चान्द्रव्याकरणे षष्ठाध्यायस्य प्रथमे पादे "मः सेटो नावम्यमिकमाचमविश्रमः" इति सूत्रमुपलभ्यते। अत्र च वृत्तिः—'ञ्णति परतो मान्तस्य सेटो वमादिवर्जितस्य यदुक्तं तन्न भवति।...... विश्रामकः व्यश्रामि' इति॥ अत एव "वेः श्रम् वा" [१।६] इति क्रमदीश्वरसूत्रव्याख्यायां गोयीचन्द्रेणोक्तम्—चन्द्रोऽत्र नित्यां वृद्धिमाह, भागवृत्तिकारस्तु नित्यं वृद्ध्यभावम्। वेः श्रमेर्वेति वर्द्धमानः। तथाच विश्रमार्थमुपगूढमजस्रम् [शिशु १०।८८] इति माघः। विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः [शाकुन्तल २।६] इति कालिदासः; सूर्यविश्रामा भूमिरिति वामनेनापि दर्शितम्' इति। अत एव रुचिपतिनाप्युक्तम्—'ननु श्रमु तपसि खेदे च' इति धातोर्घञि कृते 'नोदात्तोपदेशस्य' इति वृद्धिनिषेधे विश्रम इति स्यात्। मैवम्। "वौ श्रमः" इति महाभाष्यवचनाद् विपूर्वादपि श्रमेर्वृद्धिः। अत एव चान्द्रव्याकरणे विश्राम एव साधितः' इति।

स्थिरदेवेन मेघदूतव्याख्यायामुक्तम्—"वौ श्रमेः" इति विभाषा दीर्घः इति।

शाकटायनेनापि "विश्रमो घञि" [४।१।२३४] इति सूत्रेण विकल्पेन वृद्धिर्विहिता।

हेमचन्द्रेणापि 'विश्रमे वा' [४।३।५६] इति सूत्रं प्रणीतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्घटवृत्तिकृतात्रोक्तम्—"कथं 'विश्रामवृक्षस्थितिहेतवो न गणिता बन्धूपमाः पादपाः" इति "विश्रामाज्जायते बलम्' इति च ? उच्यते। "अनाचमिकमिचमीनाम्" इत्यत्र केचिच्छ्रमिवमी पठन्तीति रक्षितः। ये तु न पठन्ति तेषां विश्रम इति। तथाच माघः—विश्रमार्थमुपगूढमजस्रम्" इति। श्रम निकेत कुण गुण चामन्त्रण इति चौरादिकस्य वा। सूर्यविश्रामभूमिरित्याद्यन्याय्यमेवेति वृत्तिः।" इति।

वोपदेवेनापि "जनवधः सेममोऽकमवमाचमो ञ्णित्कृदिणि स्वोऽमयमविश्रमस्तु वा" [७४५] इति सूत्रेण विकल्पो विहितः।

कातन्त्रव्याकरणस्य कृद्वृत्तौ प्रथमपादस्य तृतीयसूत्रस्य वृत्तौ वृत्तिकारेणोक्तम्—वौ श्रमेर्नत्रा निर्दिष्टस्यानित्यत्वात् विश्राम इति।

अत्र दुर्गटीका। तस्माद् वाक्यकार आह—वौ श्रमेर्विभाषेति। अत्र पञ्जी—वौ श्रमेरिति। प्रतिषेधोऽपि दृश्यते—

अविश्रमं यावदिदं शरीरं पतत्यवश्यं परिणामदुर्वहम्।
किमौषधं पृच्छसि मूढ दुर्मते निरामयं कृष्णरसायनं पिब॥
इति।

सुपद्मेऽपि 'वेः श्रमेर्घणि वा' (३।४।९१) इति विकल्पो विहितः।

"विश्रमेर्वा" (२।३९६) इति सूत्रयतः प्रयोगरत्नमालाकारस्य पुरुषोत्तमस्यापि सम्मत एव विकल्पः।

हरिनामामृते आख्यात-प्रकरणे "अमयमविश्रमां वेत्येके" (१।५९९) इति सूत्रितम्। कृदन्तप्रकरणे पुनर्वृत्तावुक्तम्—'विश्राम इत्यपशब्द इति काशिका' इति।

भोजराजेनापि सरस्वतीकण्ठाभरणे "विश्रमेर्वा" (७।१।५६) इति सूत्रेण विपूर्वस्य श्राम्यते विकल्पेन वृद्धिर्व्यधायि ञ्णिति कृति चिणि च।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

पाणिनिसूत्राणां पारमार्थिकी व्याख्या

विदितमेवैतत् प्रायेण प्रियपाठकमहाभागानां यत् केचन कवि-प्रवराः—

काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नाति बाला न हि तद्विचित्रम् ।
विशेषवित् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह ॥

इत्यादिकं पद्यमुपनिबध्य भङ्ग्यन्तरेण महर्षेरविमृष्यकारितामेव समुद्घोषयन्ति। एवमेव प्रेमिकप्रवरेण दुष्यन्तेन कुलपति-कुलतिलकस्य कण्वस्यासाधुदर्शित्वं प्रतिपादितम्—असाधुदर्शी खलु तत्रभवान् काश्यपो य इमामाश्रमधर्मे नियुङ्क्त इति। पाश्चात्त्या अपि केचन विपश्चितः—

"The lunatic, the lover, and the poet
Are of imagination all compact."

"कामुकः कविरुन्मत्तः कल्पनामयमूर्तयः" इत्याशयानस्य शेक्सपीयरमहोदयस्योन्मत्तेन साकं कविकामुकयोः समशीर्षिकया सन्निवेशनाद्दोषमेवोदाहरन्ति।

सर्वमेतदविचारितरमणीयम्। तथाहि "श्वयुवमघोनामतद्धिते" इति सूत्रमधिकृत्य प्रोक्तपूर्वं पद्यं प्रवृत्तम्। सूत्रञ्चेदं सम्प्रसारण-प्रकरणगतम्। अत एव 'सम्प्रसारणम्' इत्यस्यानुवृत्त्या 'प्रथमा भवतीत्यर्थे' इति वचनेन च भवतेः सन्निवेशेन सूत्रस्यायमेवार्थः सिध्यति—अतद्धिते वर्तमानानां श्वयुवमघोनां सम्प्रसारणं भवतीति। अशुचितमः शुनको वा भवतु, तृणीकृतजगत्त्रयसत्त्वसारस्तरुणो वा भवतु, ईश्वराणामपीश्वरो महेन्द्रो वा भवतु, परहितैकव्रतानामेवैषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समृद्धिरुपजायते, न पुनर्निरन्तरं स्वहितमेवानुध्यायताम्। स्वो हि भावः प्राणिनां स्वार्थान्वेषणं नाम, अत एवोक्तं तत्रभवता भाष्यकारेण —सर्वे इमे स्वभूत्यर्थं प्रवर्त्तन्ते। ये तावदेते गुरुशुश्रूषवो नाम तेऽपि स्वभूत्यर्थमेव प्रवर्त्तन्ते—पारलौकिकं च नो भविष्यति, इह च नः प्रीतो गुरुरध्यापयिष्यतीति। तथा य एते दासाः कर्मकरा नाम तेऽपि स्वभूत्यर्थमेव प्रवर्त्तन्ते—भक्तं चेलं च लप्स्यामहे परिभाषाश्च न नो भविष्यन्तीति। तथा य एते शिल्पिनो नाम तेऽपि स्वभूत्यर्थमेव प्रवर्त्तन्ते—वेतनं च लप्स्यामहे मित्राणि च नो भविष्यन्तीति (३।२।२६)। माघकविनाप्युक्तम्—

यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः।
वयं हनाम द्विषतः सर्वः स्वार्थं समीहते॥

इति। शर्मण्यदेशसमुद्भवेन गेटेकविनापि प्रश्नोत्तरमुखेणैतदेव प्रतिपादितम्। तथाच तद्वचनम्—

"Was ist unser höchstes Gesetz ?
Unser eigener Vorteil."

'को वास्माकं परो विधिः ?
स्वार्थ एव।' इति।

एवं स्वार्थसमीक्षणस्य स्वभावतः प्राप्तौ विधीयते—स्वार्थान्वेषणपरतया सङ्कोच एव समुपजायते, न पुनः सम्प्रसारणम्। यैः पारमार्थिकं सम्प्रसारणं काम्यते तैरवश्यमेव निरन्तरं स्वार्थपरत्वं वर्जनीयं परार्थपरत्वं चानुशीलनीयम्। एवमिहापि चित्तस्य प्रसारो नाम सम्प्रसारणं भवति, परत्रापि मोक्षो नाम सम्प्रसारणमधिगम्यते। स्वार्थपरतन्त्रश्च परमदेवोऽपि मनुजतो वा शुनकतो वा न विशिष्यते, तथाविधश्च शक्तिमानपि मर्त्यः पशुतो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नातिरिच्यते, अत एव श्वयुवमघोनामेककक्षायां विनिवेशः । पाणिनि-मतमनुवदता शार्मण्यविदुषाप्युक्तम्—

Die Verkümmerung nicht nur der Familie, sondern auch des Volkes beginnt mit dem Ueberwiegen der Selbstsucht.

'स्वार्थपरतायाः प्राबल्येन न केवलं कुलस्य जातेरपि विनाशस्य सूत्रपातो भवति' इति ।

वारान्तरे "विध्यत्यधनुषा" इति सूत्रस्य व्याख्यानं प्रकाशयिष्यते ।

देवभाषामयं पत्रम्

पण्डितप्रकाण्डस्याभिनवभट्टबाणस्य श्रीमतः कृष्णमाचार्य्यस्य पत्रम् ।

4. 11. 1930

प्रियसुहृदः, अधिगतं कृपापत्रम्, अवगतं सकुशलं वृत्तम् । केनापि कुटुम्बक्लेशेन कदर्थितोऽहं न प्राभवं सद्य एव प्रत्युत्तर-लेखन इति क्षम्यतामयमार्द्रापराधः ।

न खलु मया जाल्मेन सुरक्षणीयान्यपि रक्षितानि मत्प्रियभ्रातॄणां विद्यावाचस्पतीनां लेखनानि । यावच्छक्यं प्रयतिष्ये प्रेषयिष्यामि च लब्धानि तानि । साहित्यपरिषत्पत्रिकाकृते च श्रीमतां सादरमादेशं यथाशक्ति सम्भावयिष्यामि ।

इति

श्रीमतामादेशानुवर्ती

रा० च० वि० कृष्णमाचार्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छान्दोग्योपनिषद्गता पृच्छा

[वाचकमहाभागानामुत्तराणि सादरं प्रकाशयिष्यन्ते ।]

१। "ऋतुषु पञ्चविधं सामोपासीत। वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्" इति छान्दोग्योपनिषन्मन्त्रस्य भाष्ये (२।५।१) दृश्यते—"शरत् प्रतिहारो रोगिणां मृतानाञ्च प्रतिहरणात्, हेमन्तो निधनम्, निवाते निधनात् प्राणिनाम् ।" इति

एतद्भाष्यस्य किं वा तात्पर्यम् ?

श्रीवसन्तकुमारवन्द्योपाध्यायः । कलिकाता ।

भारतचन्द्रस्य संस्कृतं पद्यम्

गङ्गाष्टकम्

यदम्बु नाशितुं मलं महानलः सुशीतलं
प्रयाति नीचमार्गकं ददाति नित्यमुच्चतां ।
हरेः पदाब्जनिर्गतां हरित्वमेव दायिनीं
नमामि जाह्नुजां हितां कृतान्तकल्पकारिणीं ॥ १ ॥
नृनेत्वमेव गोलकं रथो भगीरथाहृता
ध्वजस्तरङ्गरङ्गको यदेव नामः चक्रकः ।
स्वयं हि यत्र सारथी रथी यदापि पातकी
नमामि जाह्नुजां हितां कृतान्तकल्पकारिणीं ॥ २ ॥
यदम्बु वह्निरुज्ज्वलः सुशीतलं नृपापहं
सुशीकरः स्फुलिङ्गकस्तु धूम एव व्योमगं ।
यदम्बु नः प्रवाह एव चाश्रयाशदाहको
नमामि जाह्नुजां हितां कृतान्तकल्पकारिणीं ॥ ३ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111127

विषं यदम्बुभक्षके निहन्ति मन्दिरासतां
दहत्यशेषपापिनां शरीरमेव देहिनो ।
यदम्बुनः प्रभञ्जनः प्रपाद्देहभञ्जनो
नमामि जाह्नुजां हितां कृतान्तकल्पकारिणीं ॥ ४ ॥

सुधा यदम्बुशीतलं ददात्यमृत्युतां दिवि
सपापदाहदाहिनां विगाहनाय स्निग्धदां ।
विगाहितस्य दर्शितस्य कर्षितस्य चिन्तया
नमामि जाह्नुजां हितां कृतान्तकल्पकारिणीं ॥ ५ ॥

निहन्तु सङ्ग उन्मदं ससैन्यकः परन्तपो
यदम्बु पत्तिसंकुलं जलध्वनिर्निनादनं ।
रथेभवाजिकादयो मतिः स्तुतिर्नतिस्तथा
नमामि जाह्नुजां हितां कृतान्तकल्पकारिणीं ॥ ६ ॥

हरिस्तथा त्रिलोचनस्त्रिलोचनी हरीश्वरौ
विधायितुं निमुक्तितां यदम्बुना शुभाकलां ।
त्रिलोकलोकपाविकां त्रिदेवताविधायिकां
नमामि जाह्नुजां हितां कृतान्तकल्पकारिणीं ॥ ७ ॥

विमलधवललीला शम्भुमौलौ विलोला
प्रबलजलविशाला स्वर्जले स्वर्णमाला ।
मदनदहनकाङ्क्षा स्वर्गसोपानसङ्गा
कलुषहरतरङ्गा भारतं पातु गङ्गा ॥ ८ ॥

[एवमेवेदं स्तोत्रमिदानीमुपलभ्यते । अत्र च प्रमादानामतिबाहुल्यं वरीवर्ति । वाचकमहाभागा गङ्गास्तोत्रस्यास्य संशोधनायाभ्यर्थ्यन्ते । मञ्जूषासम्पादकः ।]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोरेरुत्वं श्रेयः ।

[निबन्धकः—श्रीकृष्णस्वामी आर्यः]

'पुनर् रमते' इत्यनयोः सन्धिः 'पुना रमते' यत्र रेफलोपस्य क्षतिपूर्तिः पूर्ववर्णदीर्घीभावेन। 'मनस् रमते' इत्यनयोः 'मनो रमते' यत्र रेफस्य न लोपोऽपि तु स्वरादेशेन गुणोत्कर्षः। इमे सन्धी भारतवर्ष-पाकिस्थ नयोः काश्मीरविषये संबन्धं प्रस्तुतः।

विभागेनाऽखण्डभारतवर्षं 'मनस्' (भारतवर्षम्) 'रमते' (पाकिस्थानम्) इति द्विधा खण्डितम्। मनस् इत्यत्र सकारः काश्मीरः। सकाररूपस्याऽस्य राज्यस्य यवनबाहुल्यात् पाकिस्थानेन संबन्धे सति नैमित्तिकः, भारतवर्षस्य स्वाभाविकः, रेफादेशो भवति ससजुषोरिति योगेन। भारतवर्षे विभज्यमाने सति पाकिस्थानस्य संस्थापकानां मते मनसि सकारस्य रेफत्वं नैसर्गिकं न तु नैमित्तिकम्, 'मनर्' एव प्रातिपदिकमिति यावत्। अङ्ग! किमनेन पाकिस्थानस्य प्रयोजनम्? शृणु! 'मनर् रमते' इत्यत्र सत्वाभावात् उत्वाऽप्रसक्त्या रोरीति लोपे सति ढ्रलोपेतिपूर्व-सवर्णदीर्घे 'मना रमते' इति भारतवर्षस्यानिष्टापत्तिरेव पाकिस्थानस्य प्रयोजनम्। भद्र! कलिकालोऽयम्। विघ्रं पाकिस्थानं भारतवर्षं विनसं दिदृक्षु स्यादित्यत्र किमाश्चर्यम्!

यत्सत्यं पाकिस्थानं काश्मीरे नाधिकरोति भारतवर्षस्यांश(ङ्ग)-भूतत्वात् काश्मीरस्य। अतः प्रातिपदिकं तु सकारान्तमेव। रस्य रुत्वे हशि चेत्युत्वे रोरीति लोपे च प्राप्ते विप्रतिषेधेन परत्वात् लोपप्रसक्तिः। परं लोपस्याऽसिद्धप्रकरणस्थत्वादुत्वे गुणे च सति 'मनोरमते' इति रूपं सिध्यति। अत्रायं विकल्पः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१। मनस् रमते
२। मनर् रमते
३। मनउ रमते
४। मनोरमते

१। मनर् रमते
२। मनर् रमते
३। मनारमते

एकतरस्मिन्नपि पक्षे पाकिस्थानस्य कोऽपि लाभो नास्ति। एकत्र काश्मीरलोपो भारतवर्षस्य क्षतिपूर्तिश्च, अपरत्र सकारस्य रुत्वे व्यञ्जनस्य स्वरतापत्तिः— [काश्मीरस्य भारतीयतावलम्बनेन, तच्च पुनर्भारतवर्षे हिन्दुयवनयोर्भेदेऽजकनाशं नष्टे सति परस्परं प्रेमणि घृतनिधायं निहिते च सति]— यतो गुणे सति काश्मीर-भारतवर्षयोरुभयोरुत्कर्षः।

दीर्घेण वा गुणेन वा भारतवर्षस्य पाकिस्थानेन सह स्थिरा मैत्री संस्थाप्यते। परमेकः पाणिनीयोऽपरोऽपाणिनीय इत्येतावान् भेदः। अत एवोल्लिखितं रोरुत्वं श्रेय इति।

इत्थं व्याकरणं शास्त्रं राजनीतिं निनीषुणा।
मनीषितं प्रकाशितम् आचार्यकृष्णमूर्तिना॥

ऋग्वेदान्तर्गतान्युषःसूक्तानि

मण्डलम् १ सूक्तम् ४८

संहिता-पाठः

सह वामेन न उषो
व्युच्छा दुहितर्दिवः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सह द्युम्नेन बृहता विभावरि

राया देवि दास्वती ॥ १ ॥

पद-पाठः

सह । वामेन । नः । उषः ।

वि । उच्छ । दुहितः । दिवः ।

सह । द्युम्नेन । बृहता । विऽभावरि ।

राया । देवि । दास्वती ॥

Sahá (with) vāména (fortune) vyuccha (flush) nah (upon us), Uṣah (Dawn), duhitah (daughter) divah (of Heaven); sahá (with) bṛhatā' (lofty) dyumnéna (splendour), vibhāvari (O thou Goddess refulgent), dāsvatī' (bountiful that thou art) rāyā' (with riches).

काश्यपक्षितीशचन्द्रभाष्यम् । ॐ नमः शिवायै च न नमः शिवाय । ऋक्-संहितायां प्रायेण विंशतिरुषःसूक्तानि समुपलभ्यन्ते । तत्रेदममादिमं सूक्तं प्रथममण्डलान्तर्गताष्टाचत्वारिंशत्तमं षोडशर्चं—सह वामेनेति । अत्र प्रस्कण्व ऋषिः । बार्हतप्रगाथश्छन्दः । तत्रायुजो बृहत्यः, युजः सतोबृहत्यः । तल्लक्षणं च ऋक्प्रातिशाख्ये—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुष्पदा तु बृहती प्रायः षट्त्रिंशदक्षरा ।
अष्टाक्षरास्त्रयः पादास्तृतीयो द्वादशाक्षरः ॥ १६। ४९ ॥

युग्मावष्टाक्षरौ पादावयुजौ द्वादशाक्षरौ ।
सा सतो बृहती नाम ॥ १६ । ५७

बार्हतो बृहतीपूर्वः ककुप्पूर्वस्तु काकुभः ।
एतौ सतोबृहत्यन्तौ प्रगाथौ भवतो द्व्यृचौ ॥ १८।१

इति । उषो देवता । प्रातरनुवाकाश्विनयोः शस्यते ।

अये दिवो दुहितः उषः वामेन सह नः व्युच्छ इति पूर्वार्धर्चान्वयः । अये दिवः स्वर्गस्य दुहितः पुत्रि उषः उषःकालदेवते वामेन सम्पदा सह नः अस्माकमुपरि, अस्मदर्थं वा व्युच्छा व्युच्छ दीप्यस्व । अये विभावरि विशेषेण द्योतमाने बृहता प्रभूतेन द्युम्नेन हिरण्य-रजतादिना वा यशसा वाऽन्नेन वा । नः व्युच्छ इत्यनुषङ्गः । अये देवि, दास्वंती त्वं राया नः व्युच्छ इति पूर्ववदनुषङ्गः । अये देवि दीप्य-माने, दास्वती दानविशिष्टा त्वं राया द्रव्यजातेन नः व्युच्छ ।

अये उषो देवि, स्वर्लोकात् समधिगतजन्मा त्वं प्रातर्गग-नाङ्गने प्रकाशमासादयन्ती संयोजयास्मान् स्वर्गीयया सम्पदा, विष्वग्विसर्पिभिः समुज्ज्वलैः प्रभाजालैर्विराजमाना त्वं सम्भा-वयास्मान् समुज्ज्वलतमेन प्रभूतेन हिरण्यरजतादिना यशःपटलेन च, वदान्यप्रवराणां शिरसि समवस्थिता त्वमभिवर्षास्मान् विविधैर्वस्तु-जातैरिति हृदयम् । इहैते वामद्युम्नरैशब्दाः समानेऽपि धनार्थत्वे व्यवस्थितविषया बोद्धव्याः । तत्र वामशब्दः सामान्यतो धन-वाचकः, द्युम्नशब्दो दीप्यमानमणिरत्नादिबोधकः रैशब्दश्च गोअ-श्वादि-पशुप्रभृत्यभिधायकः । माधवेनापि प्रायेणेदृश एव भेदो दर्शितः—वामं द्युम्नं रयिरिति धनस्यैव गुणैर्बहुशो वादः । तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वमिः प्रकाशनार्थो द्युम्निर्दीप्त्यर्थो रातिर्दानार्थः। यद्वा वामं धनम् द्युम्नम् अन्नम् रयिः पशुरिति।

इदानीं व्याकरण-प्रक्रिया विस्तरेण विलिख्यते।

सह। निपातानामाद्युदात्तत्वेऽपि "एवादीनामन्तः" इति फिट्-सूत्रेण [४।१४] सह-शब्दोऽन्तोदात्तः। वामेन। निघण्टौ वाम-शब्दः "अम्नेमाः अनेमाः अनेद्यः अनवद्यः" इत्यादिषु दशसु प्रशस्य-नामसु पठितः। यद्यपि "वामौ वल्गु-प्रतीपौ द्वौ" इत्यमर-ग्रन्थ [३।३।१४४] व्याचक्षाणैष्टीकाकृद्भिर्वमतेर्वा वातेर्वा व्युत्पादितो वामशब्दः, तथापि निघण्टौ प्रशस्य-पर्य्यायेष्वस्य पाठात्, प्राचीनैश्च भाष्यकृद्भिर्निरुक्तकारादिभिर्वननीयेति प्रतिशब्दोपादानात्, वन षण सम्भक्तौ इति वनधातोर्मक्ति वामशब्दो निष्पन्न इत्यभ्युपगन्तव्यम्। क्तित्त्वाद् "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" [६।४।३७] इत्यनुनासिकलोपः, "अन्येषामपि दृश्यते" [६।३।१३७] इति दीर्घत्वम्। "प्रत्ययः। परश्च। आद्युदात्तश्च" [३।१।१-३] इति प्रत्ययस्वरेणाद्युदात्तत्वम्। "अनुदात्तौ सुप्पितौ" [३।१।४] इति तृतीयैकवचनविभक्तेरनुदात्तत्वम्। "टाङसिङसामिनात्स्याः" [७।१।१२] इति टास्थाने जातस्य इनस्य स्थानिवद्भावेनानुदात्तत्वम्। ततश्च "आद् गुणः" [६।१।८७] इति गुणलक्षणस्यैकादेशस्य "एकादेश उदात्तेनोदात्तः" [८।२।५] इत्युदात्तत्वम्। श्यामादिवद् वामशब्दोऽयं प्रथमतो विशेषण एवासीत्, ततश्च "विशेषणमात्र-प्रयोगो विशेष्य-प्रतिपत्तौ" इति न्यायेन मही-पृथ्वी-प्रभृतिवत् सत्त्ववचनः सम्पन्नः। नः। शेषे षष्ठी, तादर्थ्ये वा चतुर्थी। "अनुदात्तं सर्वमपादादौ" इत्यधिकारे युष्मदस्मदोः षष्ठी-चतुर्थी-द्वितीयास्थयोर्वांनावौ" इत्येतदनन्तरेण "बहुवचनस्य वस्नसौ"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[८।१।२१] इति सूत्रेण नसादेशोऽनुदात्तः। उषः। उषाः कस्मात् उच्छतीति सत्याः। रात्रेरपरः कालः [२।१८] इति। उषा वष्टेः कान्तिकर्मणः। उच्छतेरितरा माध्यमिका [१२।६] इति च निरुक्तम्। उवासोषा उच्छाच्च नु [ऋ सं १।४८।३], या व्यूषुर्याश्च नूनं व्युच्छान् [ऋ सं १।११३।१०], शश्वत् पुरोषा व्युवास देवी ... ..अथो व्युच्छादुत्तराँ अनु द्यून् [ऋ सं १।११३।१३] इत्यादिषु उवासादीनां सहचरतया उच्छादीनां प्रयोगात् सर्वेषामेकधातुमूलकत्वं प्रतीयते। अत एव "इषुगमियमां छः" [७।३।७७] इत्यत्र "ऋ-यु-प्रशाम् उपसंख्यानं कर्तव्यम्" "वसेः सम्प्रसारणञ्च" इति च वक्तव्यम्। ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु, युच्छ प्रमादे, प्रच्छ ज्ञीप्सायाम्, उच्छी विवासे इति धातवः परमार्थतश्छविकरणा इति प्रतिभाति। अस्मादेव च दीप्त्यर्थाद् वसधातोर्वसन्तशब्दो निष्पन्नः। वसन्ततौ हि विकसितकुसुमसमृद्ध्या देदीप्यते वसुन्धरेति। अस्मादेव वसधातोः "वसेः कित्" [९९४] इति दशपादीसूत्रेण कानुबन्धासिप्रत्यये, "वचिस्वपियजादीनां किति" [६।१।१०] इति सम्प्रसारणे, "सम्प्रसारणाच्च" [६।१।१०८] इति पूर्वरूपैकादेशे, उषस्-शब्दो निष्पन्नः। सोऽयं प्रत्ययस्वरेणान्तोदात्तः। तस्य च सम्बोधनैकवचने 'उषः' इति पदम् "आमन्त्रितस्य च" [८।१।१९] इत्याष्टमिकसूत्रेण सर्वानुदात्तम्। वीत्युपसर्गो "निपाता आद्युदात्ताः" इत्यनन्तरवर्त्तिना "उपसर्गाश्चाभिवर्जम्" [४।१३] इति फिट्सूत्रेणोदात्तः। उच्छा। प्राचीनमते 'उच्छी विवासे' इति धातोः, नवीनमते "वस उच्छासे" इति धातो र्लोण्मध्यमपुरुषैकवचने रूपम्। "द्व्यचोऽतस्तिङः" [६।३।१३५] इति संहितायां दीर्घत्वम्। "तिङ्ङतिङः" [८।१।२८] इति निघातः। वि उच्छा इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थिते "इको यणचि" [६।१।७७] इत्युदात्तस्य इकारस्य स्थाने यकारादेशे परवर्त्तिनोऽनुदात्तस्य उकारस्य "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" [८।२।४] इति स्वरितत्वम्। अयञ्च स्वरितो जात्य इति व्यपदिश्यते। दुहधातोः कर्त्तरि तृन्-प्रत्यये दुहितृ-शब्दो निष्पद्यते। "ञ्नित्यादिर्नित्यम्" [६।१।१९७] इति ञित्वादाद्युदात्तत्वम्। "दुहिता दुर्हिता दूरे हिता दोग्धे र्वा" इति निरुक्तम् [३।४]। दुहितु र्हि सत्पात्रे प्रतिपादनं नितरामायाससाध्यमिति सा दुर्हिता। तथाचोक्तं भासकविना—कन्यापितृत्वं सततं बहुचिन्तनीयम् [अविमारक १।२] इति। एतदेव विस्पष्टीकृतं पञ्चतन्त्रे—

जातेति कन्या महतीह चिन्ता कस्मै प्रदेयेति महान् वितर्कः।
दत्ता सुखं प्राप्स्यति वा न वेति कन्यापितृत्वं खलु नाम कष्टम्॥

इति। आम्नायते च बह्वृच-ब्राह्मणे "कृपणं ह दुहिता" [ऐ ब्रा ३३।१] इति। स्मर्यते च—

सम्भवे स्वजनदुःखकारिका सम्प्रदानसमयेऽर्थहारिका।
यौवनेऽपि बहुदोषकारिका दारिका हृदयदारिका पितुः॥

इति। दूरे सती हिता पितृकुलस्य शुभा भवति। तथाचोक्तं कविकुलचूडामणिना कालिदासेन—

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते
प्रियाप्रिया वा प्रमदा स्वबन्धुभिः॥ इति।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासस्य सूक्तयः ।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ रघुवंश १।१

'For a mastery of words and meanings I worship Pārvatī and Parames'vara who are the parents of the universe and who are as inseparably united together as words and their meanings.'

[तां नारदः कामचरः कदाचित्
कन्यां किल प्रेक्ष्य पितुः समीपे ।
समादिदेशैकवधूं भवित्रीं
प्रेम्णा शरीरार्द्धहरां हरस्य ॥ कुमारसम्भव १।५०

'Once on a time Nārada, wandering about at will, chanced to see the maiden by her father's side and prophesied that she would be the only wife of S'iva and she would become "an object of such unexampled love on his part, as to take the place of half his corporeal frame."

अखण्डितं प्रेम लभस्व पत्यु-
रित्युच्यते ताभिरुमा स्म नम्रा ।
तया तु तस्यार्धशरीरभाजा
पश्चात्कृताः स्निग्धजनाशिषोऽपि ॥ कुमार ७।२८

'They said to Umā as she bowed before them, May you win the undivided love of your husband. She, however, sharing the half of his body, left even the blessings of affectionate relatives far behind.'

The reference in all these cases is to the Ardha-nārīs'vara form of S'iva in which the right half is man (representing S'iva) and the left half woman (representing Pārvatī). The most remarkable image of this form, a magnificent specimen of the sculptor's art, is preserved in the Kailāsa cave at Ellora.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Kālidāsa speaks of words and their meanings again in the following stanza :

तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ॥ कुमार ६।७९

'It behoves you to unite him with your daughter even as sense is united with sound. A daughter bestowed on a worthy husband never becomes an object of grief to her father.']

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ रघु १।१०

'It behoves wise and discriminating critics to listen to it (the poem Raghuvams'a), for it is in the fire that the purity or alloy of gold is detected.'

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ रघु १।१८

'It is for the well-being of his subjects that he accepted tributes from them ; it is for returning it back thousand-fold that the sun draws up moisture (from the earth.)'

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ रघु १।६९

'The merit arising from penance and charity produces happiness in the next world, but offspring sprung from a spotless race is for our well-being in this world, as well as in the next.'

प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः । रघु १।७९

'Failure to honour those to whom honour is due, stands in the way of one's well-being.'

अलं महीपाल तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्छति मारुतस्य ॥ २।३४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'Cease, O king, from your futile efforts. The missile even though discharged at me will be in vain. The velocity of the wind which has the power to uproot trees does not prevail against a rocky mountain.'

स त्वं निवर्तस्व विहाय लज्जां
गुरोर्भवान् दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद् यशः शस्त्रभृतां क्षिणोति ॥ रघु २।४०

'So turn you back. Do not be ashamed. You have shown a disciple's devotion to your preceptor. For, loss of treasure which no weapon can save stains not the glory of the warrior.'

एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतो र्बहु हातुमिच्छन्
विचारमूढ़ः प्रतिभासि मे त्वम् ॥ रघु २।४७

'Undisputed sway over the globe, fresh youth and this beautiful frame—wishing to sacrifice all this for for a trifle, you seem to me to be lacking in discernment.'

[इदमेव हि पाण्डित्यं चातुर्यमिदमेव हि ।
इदमेव सुबुद्धित्वं यत् स्वल्पाद् भूरिरक्षणम् ॥

'It is erudition, it is cleverness, it is wisdom to preserve the greater at the loss of the less.']

Cf. "Not I ; but a man is a fool to die, if he can help it, before life has lost its salt. You are in your prime. Power is sweet and knowledge is sweet. Why fling a kingdom away when you might live to reign over it for fifty years more ?...And all you gain in exchange is a handful of gravel and dust, as useless to you as the ground you walk on." EDEN PHILLPOTTS.

तद्रक्ष कल्याण-परम्पराणां
भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्न-
मृद्धं हि राज्यं पदमैन्द्रमाहुः ॥२।५०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'Preserve, therefore, your vigorous frame, enjoyer of blessings untold; for a prosperous kingdom, they say, is the abode of Indra, only it is in contact with the surface of the earth.'

क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा ॥ २।५३

'The glorious appellation, Kshatra, is known throughout the world to mean 'a preserver from dangers.' What is the use of kingdom or of life stained with infamy to him who by his conduct gives the lie direct to this well-known derivative meaning ?'

पुस्तकपरिचयः ।

चन्द्रालोकः । (पञ्चममयूखस्य पञ्चाशत् कारिकाः) Dr. K. K. Raja, M. A., Ph. D., N. V. Krishna Warrier B. O. L M. Litt.-समाख्याभ्यां विद्वद्भ्यां सम्पादितः । The University Publishers, Trichur इत्यतः प्रकाशितः । मूल्यं सपादरूपकद्वयम् ।

पीयूषवर्षजयदेवविरचितश्चन्द्रालोकः सुगमतया छात्राणामतीवोपकारी वर्तते । अलङ्कारनिबन्धेषु प्रायेण मुखस्योपमेयत्वेन चन्द्रस्य चोपमानत्वेनोपादानाद् अलङ्कारशास्त्रीयनिबन्धस्य चन्द्रालोक इति समाख्या कमपि शोभाविशेषं पुष्णाति । अत्र च पुस्तके पञ्चममयूखस्यादितः पञ्चाशत् कारिका आङ्लानुवाद-व्याख्यानादिभिर्विभूषिता विराजन्ते । अनुवादो व्याख्यानञ्च सर्वथा जटिलतानिर्मुक्तमित्यहो सौभाग्यं छात्राणाम् । अत्र च प्रायेणैकयैव कारिकया लक्षणमुदाहरणञ्च प्रदश्यंते । संस्कारकमहाभागाभ्याञ्च प्रबन्धान्तरेभ्योऽप्युद्धृत्य सुमनोहराण्युदाहरणानि सन्निविष्टानि । यैर्विनैवायासं मुख्यानामलङ्काराणां लक्षणादिकमवबोद्धुमिष्यते तैरवश्यं संग्राह्योऽयं प्रबन्धः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কলিকাতা বিশ্ববিদ্যালয়ের অধ্যাপক

শ্রীক্ষিতীশচন্দ্র চট্টোপাধ্যায়, এম. এ. ডি. লিট্ প্রণীত

শব্দ-কথা

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে। সংস্কৃত ব্যাকরণের দিক্ দিয়া. বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া, বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোত-শব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম ত'র পর আছে, না দ্বিতীয় ত'র পর আছে, না উভয় ত'র পর আছে, সঠিক শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, চন্দ্রমাঃ, পূর্ণিমা ও অমাবস্যা শব্দের ব্যুৎপত্তি কি, লাবণ্যলালিম মুখমণ্ডল কমনীয় কিনা, অনীতা, নমিতা, ইভা, জিগেন্দ্র প্রভৃতি নামগুলির অর্থ কি প্রভৃতি নানা বিষয় আলোচিত হইয়াছে। সোনার পাথর বাটী প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী, গ্রীক্, লাটিন্, জার্মান প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। সন্ধির কথায় সন্ধির বৈজ্ঞানিক ব্যাখ্যা ইংরাজী, লাটিন ও আরবী ভাষায় সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব, ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে। বাঙ্গালা, ইংরাজী ও সংস্কৃত ভাষায় অধ্যাপক ও ছাত্র, সাহিত্যিক, সাংবাদিক প্রভৃতির পক্ষে এই গ্রন্থ অত্যাবশ্যক।

মূল্য দুই টাকা মাত্র

উষার আলো

ইহাতে দেশ-বিদেশে প্রচলিত হাস্যরসাত্মক কৌতূহলোদ্দীপক অথচ শিক্ষাপ্রদ শতাধিক ছোট গল্প সন্নিবিষ্ট হইয়াছে। পড়িতে পড়িতে হাসিয়া অস্থির হইতে হইবে। **মূল্য বার আনা মাত্র**

নক্ষত্রমালা। শ্রেষ্ঠ শ্লোকসমষ্টি, ব্যাখ্যা ও অনুবাদ। মূল্য পাঁচ আনা মাত্র

শ্রীবিশ্বনাথ চট্টোপাধ্যায়

৮১নং নিউ শ্যামবাজার ষ্ট্রীট, কলিকাতা—৪।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University;

Formerly Editor, Calcutta Oriental Journal,

Surabharati, Oriental Literary Digest, etc., etc.

It is a unique work dealing with and throwing a flood of light on the technical terms found in the Nirukta, different Pratishakhyas and Panini, Katantra, Chandra, Jainendra, Sakatayana, Hemachandra, Samkshiptasara, Mughdabodha, Sarasvata, Supadma, Prayogratnamala and Harinamamrita systems of Sanskrit Grammar.

It offers for the first time rational explanations of even such apparently meaningless terms as lat, ghi, ghut, bha.

It gives reasons for the use of particular letters as Anubandhas by Panini and his successors.

It contains many charming poems about these technical terms with their English translations.

No serious student or teacher of Sanskrit or Philology can afford to do without the book.

The book is priced at Rupees Ten and will be sent per Regd. Post on receipt of Rs. 10/8/- by Money Order.

VISVANATH CHATTERJI

81, New Shyambazar Street,

CALCUTTA—4.

Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press, 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशिवः शरणम्

४र्थ-वर्ष संख्या २

मञ्जूषा

संस्कृतभाषामयी मासिक-पत्रिका

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Articles in this number

S'aṃkarācārya's Saccidānanda-pradīpikā

काष्ठशब्दादिश्वि-प्रत्ययः।

NEXT MONTH

Golden Thoughts from Goethe

If you want to learn Sanskrit without tears, if you want to get acquainted with all that is best in Sanskrit literature and Indian culture, if you want to keep abreast of Indological research, you must subscribe to the MANJUSHA. The commentary on the Uṣā-hymns, the Gāthās with Sanskrit translation, the Mahābhāṣya with English translation and notes, ancient inscriptions, Notes and Queries, letters in Sanskrit, proverbs and maxims from the different Indian and European languages are some of the special features of the MANJUSHA.

Office : 81 Shyambazar Street, Calcutta—4
Annual Subscription : Rupees Six only,
Foreign : Rupees Eight.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्।

२। प्रतिसौरमासं दशम दिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते; तृतीये भागे सानुवादाः पारसीकानां गाथाः, साङ्लानुवादं महाभाष्यम्, सभाष्यश्च ऋग्वेदो मुद्रयन्ते।

४। सनातन-भारतधर्म-विरुद्धाः प्रबन्धाः कथञ्चिदपि न प्रकाश्येरन्।

५। आपाततः प्रतिमासं द्वात्रिंशत्-पृष्ठात्मिका मञ्जूषा प्रकाश्यते, सति ग्राहकाणां बाहुल्ये पञ्चाशत्-पृष्ठात्मिकापि प्रकाश्येत।

एषा द्वितीया संख्याल्पीयसैव कालेन मुद्रितेति सम्यक् शोधनाभावात् कदाचिदत्र सावशेषत्वं प्रमादानां स्यात्, तत् क्षम्यतां सहृदयैः। द्वित्रैरेव च मासैः शोधनादीनां समीचीना व्यवस्था भविष्यति।

श्रीविश्वनाथ चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४।

81, Shyambazar Street, Calcutta 4.

Phone : B. B. 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

October, 1949	१८७१-शाकीय-कार्त्तिकस्य ४र्थ-वर्षस्य २य-संख्या	Vol. IV No. 2

सुभाषित-रत्नानि

यावत् स्वस्थमिदं कलेवरगृहं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥१॥

भर्तृहरिः ।

यावत् स्वस्थो ह्ययं देहो यावन्मृत्युश्च दूरतः ।
तावदात्महितं कुर्यात् प्राणान्ते किं करिष्यसि ॥२॥

वृद्धचाणक्यः ।

विप्रश्चन्द्रश्चन्दनश्चैकजातिर्नारी वीणा कोकिलश्चैकजातिः ।
अश्वः खड्गः क्षत्रियश्चैकजातिः काष्ठं मूर्खो गर्दभश्चैकजातिः ॥३॥

सुभाषितार्णवः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सतां दुर्जनसंसर्गान्मानभङ्गः पदे पदे ।
पावको लोहसंसर्गान्मुद्गरैरभिहन्यते ॥४॥

प्रसङ्गाभरणम् ।

मृगैर्नष्टं शशैर्लीनं वराहैर्वलितं रुषा ।
हयानां हेषितं श्रुत्वा सिंहैः पूर्ववदासितम् ॥५॥

शार्ङ्गधरपद्धतिः ।

शक्याशक्यपरिच्छेदं कुर्याद् बुद्ध्या प्रसन्नया ।
केवलं दन्तभङ्गाय दन्तिनः शैलताडनम् ॥६॥

कामन्दकीयनीतिसारः ।

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥७॥

महाभारतम् ।

सदा चरति खे भानुः सदा वहति मारुतः ।
सदा धत्ते भुवं शेषः सदा धीरोऽविकत्थनः ॥८॥

साहित्यदर्पणम् ।

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः ॥९॥

अभिज्ञानशकुन्तलम् ।

आभाणक-रत्नानि

१ । अग्निदाहादपि विशिष्टं वाक्पारुष्यम् ।
Men may speak daggers, though they use none.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२। वरमद्य कपोतः श्वो मयूरात् ।
वरं तत्कालोपनता तित्तिरि र्न पुनर्दिवसान्तरिता मयूरी ।
वरं सांशयिकान्निष्कादसांशयिकः कार्षापणः ।
अध्रुवाद् ध्रुवं वरम् ।
ध्रुवाणि परित्यज्याध्रुवं न निषेवेत ।

A bird in the hand is worth two in the bush.

(शा) Ein Sperling in der Hand ist besser als zwei auf dem Dache.

(फ) 'Un tiens' vaut deux 'tu l'auras'.

पाणिपुटसंस्थ एको विहगो गुल्मान्तःस्थाभ्यां द्वाभ्यां तुल्यमूल्यः ।

One bird in the net is better than a hundred flying.

वरमेकः पक्षी जालगतः, न पुनः शतमुड्डयमानाः ।

(ला) Plus (more) valet (is worth) in manibus (in the hands) avis (bird) unica (one) fronde (in the branch) duabus (than two).

(ला) Praesentem mulge, quid fugientem insequeria ? .

रत्नं हस्तगतं रत्नं परहस्तगतं नहि ।
रत्नाकरेऽस्ति यद्रत्नं ततः किं कार्यसाधनम् ॥

(शा) Besser ein Vogel in der Hand als zehn über Land.

Better one bird in hand than ten in the wood.

(फ) Mieux vaut un present que deux futurs.

३। [धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।]
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Prevention is better then cure.

(शा) Vorsicht ist besser als Nachsicht.

(शा) Forsorge hütet Nachsorge.

उत्पन्नापत्प्रतीकाराद् अनर्थोत्पत्तिप्रतिबन्धक एव वरम् ।

उत्पन्नप्रतीकारादनुत्पादनं वरम् ।

४। (व) ठाकुर घरे के ? ना, आमि त कला खाइ नि।

"कस्त्वं रे पूजनागारे ?" "नाऽऽशिता कदली मया ।" *

He who excuses himself accuses himself.

यो हि स्वदोषं क्षालयति स आत्मानं दूषयति ।

(फ) Qui s'excuse, s'accuse.

(ला) Dum excusare credis, accusas.

५। (व) दैवतार वेला लीलाखेला

पाप लिखेछे मानुषेर वेला ।

दैवतानां लीलाक्रीडनम्, मनुष्याणां पुनः पापमेव ।

(ला) Quod licet Jovi, non licet bovi.

What is allowed to Jupiter is not allowed to the bull.

यत् किल देवराजायानुमन्यते न तद् गवेऽनुमन्यते ।

यादृशो यक्षस्तादृशो बलिः

कश्चिद् भारतीय आमेरिकादेशं गतः। यावदसौ नावोऽवतीर्ण-स्तावद् द्वाभ्यां पौराभ्यां नर्मणा पृष्टः—कति वा जना अत्र

---

* पुजनागारे कश्चन शिशुः प्रविश्य देवतार्थं रक्षितानि पक्वकदलीफलानि भक्षयति स्म । ततश्च शब्दमुपश्रुत्य मात्रा पृष्टम्—अरे रे कस्त्वमुपस्थानगृहे ? इति । कदलीभक्षणपरेण बालेन नाहमम्बाश्नामि रम्भाफलानीति वदता स्वावस्था निवेदिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवसन्तीति। तेनोक्तं शतमिति। तच्छ्रुत्वा द्वावेव तावुच्चैर्जहसतुः। ततश्च कथञ्चित् प्रशान्तिमुपगते हास्यव्यापारे ताभ्यामनुयुक्तो भारतीयः — कथं त्वमेवं जानासीति। भारतीयेनोक्तम्, एतत्त्वतीव सुगमम्। अहं तावदेकः, युवां तु द्वौ शून्याविति।

ऋग्वेदान्तर्गतान्युषःसूक्तानि

[निवन्धकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(पूर्वानुवृत्तिः)

दोग्धि अपहरति सर्वस्वं पितृकुलादिति वा दुहिता। प्रातरुत्थाय पितृकुले गा दोग्धीति वा, जातापत्या शिशवे दुग्ध इति वा दुह-धातोर्निष्पन्नो दुहितृ-शब्दः। तस्यामन्त्रितैकवचने "ऋतो ङिसर्वनामस्थानयोः" [७।३।११०] इति गुणः। "उरण् रपरः" [१।१।५१] इति रपरत्वम्। "खरवसानयोर्विसर्जनीयः" [८।३।१५] इति रेफस्य विसर्जनीयत्वम्। आमन्त्रितनिघातः। दिव्-धातोः विजन्तस्य दिव्-शब्दस्य षष्ठ्येकवचने रूपम्—दिव इति। "ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः" [६।१।१७१] इति विभक्तिरुदात्ता। "सुबामन्त्रिते पराङ्गवत् स्वरे" [२।१।२] इत्यत्रत्येन "परमपि च्छन्दसि" इति वार्त्तिकेन पूर्वाङ्गवद्भावादामन्त्रितनिघातः। तथाच महाभाष्यम्—परमपि छन्दसि पूर्वस्य [आमन्त्रितस्य] अङ्गवद् भवतीति वक्तव्यम्। आ ते पितर्मरुतां सुम्नमेतु [ऋ सं २।३३।१] प्रति त्वा दुहितर्दिवः [ऋ सं ७।८१।३], वृणीष्व दुहितर्दिवः [ऋ सं १०।१२७।८] इति। गगनमार्गे उषस आविर्भावो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतीति सा दिवो दुहितेत्युपवर्ण्यते। द्युम्नेन। निघण्टौ मघमित्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु द्युम्नमिति पठितम्। उक्तं च निरुक्ते [५।५]—"द्युम्नं द्योततेर्यशो वान्नं वा। अस्मे द्युम्नमधि रत्नं च धेहि" इति। अकारसंयुक्तस्य मनिन्-प्रत्ययस्य प्रथमाकारलोपेन म्नप्रत्ययस्योद्भवमातिष्ठन्ते वैदेशिकाः। अयं च भावार्थकस्तद्धितप्रत्ययः सुम्न-निम्न-नृम्ण-द्युम्नेषूपलभ्यते। अत एव "तस्य भावस्त्वतलौ" [५।१।११९] इत्यत्र 'सुनिनृद्युषु म्नो वक्तव्यः' इति वार्त्तिकं पठनीयम्। ततश्चाकाशार्थकद्युशब्दान् म्नप्रत्यये औज्ज्वल्यार्थकद्युम्नशब्दो निष्पन्नः, क्रमेण च लक्षणया समुज्ज्वलं वस्तु धनरत्नादिकं यशो वान्नं वार्थः सम्पन्नः। स्वरप्रक्रिया वामेनेतिवद् द्रष्टव्या।

बृहता। वेदेषु तौदादिको बृहतिरुपलभ्यते, तस्माच्छतृप्रत्यये बृहच्छब्दो निष्पद्यते। तौदादिकस्य बृहेर्लोकेऽनुपलम्भात् बृहच्छब्दस्य च सर्वथा कर्मादिराहित्येन विशेषणरूपेण प्रयुक्तत्वादस्य शतृप्रत्ययान्तत्वं विस्पष्टतया न प्रतीयते स्म, अत एवोणादिषु "वर्तमाने पृषद् बृहन्महज्जगच्छतृवच्च" [२।८४] इति सूत्रेण शतृवत्त्वमेषां विहितम्। वार्त्तिककृता च "शतुरनुमो नद्यजादी" [६।१।१७३] इत्यत्र "नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानम्" इत्यसर्वनामाजादिविभक्तेरुदात्तत्वं विहितम्। विभावरी। वि विशेषेण भाति दीप्यत इति विभावरी। विपूर्वाद् भातेः "आतो मनिन् क्वनिब् वनिपश्च" [३।२।७४] इति वनिप्। "वनो र च" [४।१।७] इति स्त्रियां ङीप्, रश्चान्तादेशः। "अम्बार्थनद्योर्ह्रस्वः" [७।३।१०७] इति ह्रस्वत्वम्। आष्टमिको निघातः। निघण्टौ विभावरीशब्द उषोनामसु पठितः, शर्वरी च रात्रिनामसु। क्रमेण च नक्षत्र तारा-ग्रह समुद्भासिता तमस्विनी विभावरी-शब्देन व्यपदिश्यते स्म, ततश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छता कालेन शब्दोऽयं सामान्यतो रात्रिवचनः संवृत्तः। अत एव "वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते" [कुमार ५। ४४] इत्यादिषु विभावरी-शब्दः कमपि शोभाविशेषं पुष्णाति। अत एवामरेण —

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।
विभावरी-तमस्विन्यौ रजनी यामिनी तमी ॥ १।२।४

इति रात्रि-पर्य्याया: पठिता:। राया। दानार्थकराधातोर्निष्पन्नस्य धनार्थकस्य रैशब्दस्य तृतीयैकवचने रूपम्। "ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः" [६।१।१७१] इति विभक्तिरुदात्ता। देवि। दिव्धातोः [३।१।१३४] पचाद्यचि देवशब्दो निष्पन्नः। पचादिषु देवडिति निर्देशात् "टिड्ढाणञ्—" [४।१।१५] इति स्त्रियां ङीप्। अचश्चित्त्वात् देवशब्दः "चितः" [६।१।१६३] इत्यन्तोदात्तः। ङीपः पित्त्वादनुदात्तत्वम्। देव ई इति स्थिते "यस्येति च" [६।४।१४८] इत्युदात्ताकारलोपे "अनुदात्तस्य च यत्रोदात्तलोपः" [६।१।१६१] इतीकारस्योदात्तत्वम्। "अम्बार्थनद्योर्ह्रस्वः" [७।३।१०७] इति ह्रस्वः। आमन्त्रितनिघातः। दास्वती। ददातेः "सर्वधातुभ्योऽसुन्" [उ ४।१९०] इति भावेऽसुन्। ततश्च दास्-शब्दात् "तदस्यास्त्यस्मिन्" [५।२।९४] इति मतुपि "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" [८।२।९] इति मस्य वत्वे, "उगितश्च" [४।१।६] इति स्त्रियां ङीपि दास्वतीति सम्पन्नम्। "तसौ मत्वर्थे" [१।४।१९] इति रुत्वाद्यभावः। असुनो नित्त्वादाद्युदात्तत्वम, मतुब्ङीपोः पित्त्वात् "अनुदात्तौ सुप्पितौ" [३।१।४] इत्यनुदात्तत्वम्। अत एवाद्युदात्तो दास्वती-शब्दः। ततश्च "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" [६।१।६८] इति सोर्लोपः। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्न्येवापराध्यति

हृष्टपुष्टाङ्गं कञ्चन भिक्षाकं विलोक्य देवदत्तोऽवदत्, भो भोः किमिति कर्मक्षमोऽपि त्वं भिक्षया वृत्तिं कल्पयसीति। भिक्षुकेणोक्तम्, भद्र, नात्रापराधो मम। पत्न्या एव दोषेणाहमीदृशीमवस्थामापन्नोऽस्मि। देवदत्तेनोक्तम्—कथमिव? भिक्षुकेणोक्तम्—मया तावत् त्रिः कर्मसु तस्या नियोगः कारितः, सा च वारत्रितयमेव समुद्धतस्वभावतया कर्म जहाविति।

शब्दशुद्धिः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

बहुविवाहमधिकृत्य स्वर्गतेश्वरचन्द्र-विद्यासागरमहोदयेन वङ्गभाषामयः प्रबन्धः प्राणायि, तत्र च महता संरम्भेण जीवन्त्यां पत्न्यां पत्न्यन्तरपरिग्रहः सर्वथा धर्मशास्त्रविरोधीति व्यवस्थापितम्। ततश्च विद्यासागरप्रतिद्वन्द्वितया रङ्गमञ्चमवतीर्णेन तारानाथ-तर्कवाचस्पति-महोदयेन संस्कृतभाषया संग्रथिते प्रबन्धे विलिखितम्—

"सोऽयं तस्य शेमुषीप्रतिभासः किं युक्तिमवलम्ब्य तदनवलम्ब्य स्वेच्छामात्रेण वा" इति। तत्र "कस्यचित् उपयुक्तस्य भाइपोस्य" "अति अल्प हइल" ("नितरामल्पमेव संवृत्तम्") इत्याख्ये प्रतिवादप्रबन्धे लिखितम्—तदनवलम्ब्येत्यत्र तच्छब्देन युक्तेः परामर्शः, युक्तिशब्दस्य च स्त्रीत्वे नास्ति विसंवादः, अत एवात्र 'तामनवलम्ब्य' इति वक्तुमुचितम् इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र तर्कवाचस्पतिमहाशयेन प्रत्युक्तम्—" 'तामनवलम्ब्य' इति विग्रहे 'तदनवलम्ब्य' इति समस्तं पदम्। द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः [२।१।२४] इत्यत्र गम्यादीनामुपसंख्यानम् इति वार्त्तिकं जागर्त्त्येव। तेनैव वार्त्तिकेनात्र समासः सूपपादः" इति।

ततश्च विद्यासागर-पक्षीयैस्तदानीन्तनानां वैयाकरणधुरीणानां सविधे पत्रं प्रेषितम्—

गृहं गन्तुं गृहगन्तुम्, चन्द्रं द्रष्टुं चन्द्रद्रष्टा, यष्टिमवलम्ब्य यष्ट्यवलम्ब्य इत्येवंरूपः समासो भवति न वेति।

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।
श्रितादिषु गमिगाम्यादीनामुपसंख्यानम्।

केचिदाहुः—गमिगाम्यादीनामित्यादिपदेन सुबन्तमात्रस्य परिग्रहात् गन्तुं द्रष्टा अवलम्ब्य इत्यादीनाञ्च सुबन्तत्वेनाङ्गीकारात् गृहगन्तुं चन्द्रद्रष्टा यष्ट्यवलम्ब्य इत्यादिरूपः समासो निष्प्रत्यूह एवेति।

अन्ये त्वाहुः—गमिगाम्यादीनाम् इत्यादिपदेन गमिन्-गामिन्-बुभुक्षु-विद्वस्-प्रभृतीनां कतिपयानामेव ग्रहणम्, न तु सुबन्तमात्रस्य। अतश्चन्द्रद्रष्टेत्यादिरूपः समासो व्याकरणविरुद्ध एवेति।

तत्र वैयाकरण-धुरीणैरुक्तम्—

प्रामाणिकप्रयोगघटकानां कतिपयानामेव ग्रहणं तत्त्वबोधिनीकारोऽनुमन्यते, न सर्वेषाम्, इत्यन्येषां मतमेवास्माकं सम्मतमितीदं लिखति　　　　　　राजारामशास्त्री
　　　　　　बालशास्त्री।

अत्रान्यमतमेव प्रमाणप्रमितमिति प्रमाणीकरोति धर्माधिकारी ढुण्ढिराजशर्मा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्कवाचस्पतिना समाधानान्तरमपि प्रदर्शितम्—

द्वितीयादिसुबर्थस्य भेदादेष च षड्विधः ।
क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः ॥

इति कारिकायां शब्दशक्ति-प्रकाशिकाकारेण प्रायः-शब्दप्रयोगात् तामनवलम्ब्य इत्यत्र तदनवलम्ब्य इति समस्तं पदं को वा व्याहन्तुमीष्टे इति ।

अत्र भाइपो-महोदयेनोक्तम्—अहो मूले एव प्रमादः, शब्दशक्ति-प्रकाशिकाकारेण तावत् सामान्यतः समासस्य लक्षणं निर्मितम्—

यादृशस्य महावाक्यस्यान्तस्त्वादिर्निजार्थके ।
यादृशार्थस्य धीहेतुः स समासस्तदर्थकः ॥

इति । भावप्रत्ययप्रकृतिर्महावाक्यं समास इति तस्य निष्कृष्टोऽर्थः । अवलम्ब्य-शब्दादुत्तरो भावप्रत्ययः कथमपि न सम्भवति, अत एवात्र समासस्यैव सम्भवो नास्ति कुतो वा द्वितीयातत्पुरुष-समासस्य इति ।

तर्कवाचस्पति-महोदयेन प्रकारान्तरेणापि साधुत्वं संसाधितम्—सा युक्तिः अनवलम्ब्या अनवलम्बनीया यस्याः तादृशी या स्वेच्छा तन्मात्रेणेत्येवं बहुव्रीहि-समासेन निर्वाह्योऽयं शब्दः । न च "सप्तमी-विशेषणे बहुव्रीहौ" इत्यनुशासनात् सर्वत्रैव बहुव्रीहौ विशेषण-पदस्य पूर्वनिपात इति भ्रमितव्यम्, "ब्राह्मणा मधुरप्रियाः" इति वाक्ये विशेषणस्यापि प्रियशब्दस्य पूर्वनिपातस्य सर्वेषामेव वैयाकरणानां सम्मतत्वात् इति ।

भाइपो-महोदयेनेत्थमस्य खण्डनं कृतम्—"तत्र 'वा प्रियस्य' इति वार्त्तिकेन पाक्षिकः परनिपातः । अत्र तादृशवार्त्तिकस्या-सद्भावात् परनिपातो न सम्भवति" इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्कवाचस्पति-महोदयस्य समर्थनान्तरम्—

अथवा तस्या युक्तेरनवलम्बः, तमर्हतीत्यर्थे यत्। तदनवलम्ब्या या स्वेच्छा तन्मात्रेण इति।

भाइपो-महोदयेनात्र दोषद्वयमुद्घाटितम्। तत्र प्रथमतस्तावत् अर्हति-शब्दस्य लब्धुं योग्यो भवतीत्यर्थं इति वैयाकरणाः। अत्र युक्तेरनवलम्बमर्हति अनवलम्बं लब्धुं योग्या भवतीत्यतः समीचीनोऽर्थो नैव प्रतीयते। किञ्च तदर्हतीत्यधिकारे येभ्यः शब्देभ्यो यत्प्रत्ययो विहितस्तेषु 'अनवलम्ब'-शब्दो नोपलभ्यते। अतोऽत्र यत्प्रत्ययो दुर्घट एव।

ततश्च उपयुक्तेन भ्रातुष्पुत्रेणोपसंहृतम्—खल्लतातो मे यदि सुबोधो बुद्धिजीवी चाभविष्यत् तर्हि "तदनवलम्ब्य इत्यत्र प्रमादः संवृत्तः" इति विनैवायासम् अन्तरेण च चित्तविक्षोभमङ्गीकरिष्यत्। परं स्वसम्मान-परिरक्षणार्थं "दैववशात एवं सञ्जातम्, मुनीनाञ्च मतिभ्रमः सन्दृश्यत एव" इति वचनेन सर्वमवदातमभविष्यत्। स चेत् चतुरो निपुणश्चाभविष्यत् तर्हि तामनवलम्ब्य इत्येव मया विलिखितम्, 'तदनवलम्ब्य' इति मुद्रणप्रमादोऽयम्। न खलु सम्यक् शोध्यपत्राणि संशोधयितुमलमस्मीत्येव मे दोष इत्युक्त्वा त्राणमलप्स्यत। केवलं लघुचित्ततया बालिशतया चात्मनोऽज्ञानमेवं वीथीषु विकीर्णम्। अथ चेत् प्रतारणमेवाभीष्टम्, तर्हि 'तदनवलम्ब्य' इत्यत्र तच्छब्दोऽव्यय इत्येव सुगमः पन्थाः। व्याकरणेष्वभिधानेषु चाव्ययस्य तच्छब्दस्य हेतुरूपार्थसन्दर्शनादेवं वक्तुं न पारितमिति प्रतीयते, परं तेषु तेषु ग्रन्थेषु यदि दृष्टिः प्रवेशश्चाभविष्यताम्, तर्हि हेतुव्यतिरिक्तेष्वप्यर्थेषु तस्य प्रयोगमद्रक्ष्यत्। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवश्यमेव दातव्यम्

बाष्पीयशकटस्य प्रथमश्रेण्याः प्रकोष्ठे सुखं समुपविष्टेन रक्तगलबन्धेन पुरुषेणोक्तम्—अवश्यमेवास्माभिर्दातव्यम्, देयमेवास्माभिः, अन्यथा कथं वा कस्युनिष्टभ्रातृभिर्जगतो हितं विधातुं शक्येत। विदितमेवैतद् भवतां न खल्वर्थमन्तरेण किमपि संसारे साधयितुं शक्यते इति।

"शुल्कपत्रं भद्राः" आरक्षिकेणोक्तं द्वारप्रदेशमाक्रामता।

रक्तगलबन्धेन पुरुषेण यन्त्रचालितेनेव शुल्कपत्रमारक्षिकपुरुषस्य हस्ते दत्तम्, उक्तञ्च—अथ किम्। उक्तमेव मया पूर्वं दातव्यमेवास्माभिरिति। ततश्चारक्षिकपुरुषेण सविनयमुक्तम्—बाढ़म्। मुद्रापञ्चकं—यत् किल प्रथमश्रेणी-तृतीयश्रेणी-शुल्कयोरन्तरम्—तत् कृपया दीयतामकालहीनमिति। रक्तगलबन्धेन पुरुषेण परिम्लानमुखारविन्देनारक्षिकपुरुषस्य हस्ते पञ्च मुद्राः समर्पिताः। ततश्च केनचनोक्तम्—दातव्यमेवास्माभिरिति, परं नासौ रक्तगलबन्धः।

सम्यक्!

वर्द्धमानवाष्पशकटमेलनस्थानतो* बाष्पीयशकटं यावज् झङ्कारपुरःसरं निःसरति स्म, तावदारोहिणैकेन गवाक्षमार्गेण मूर्धानं निःसार्य भारिकायोच्चैराक्रुष्टम्—रे जाल्म! किमिति मम वचनमनुमान्य शकटे मदीयानि द्रव्यजातानि न रक्षितानीति। भारिकेणोक्तम्—न खलु द्रव्याणि ते त्वमिव मूढ़ानि। त्वं तावदन्यदीयं शकटमारूढ़ोऽसीति।

---

* From Burdwan Junction.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृतो मार्जारः

हरिश्चन्द्रमहोदयः सायं गृहं प्रत्यावृत्य पत्नीं फुत्कुर्वतीमपश्यत्। स भृशमुद्विग्नः पप्रच्छ, प्रिये ! किं वा संवृत्तमिति। रोरुद्यमानया तयोक्तम्, त्वदर्थे महतायासेन तावदपूपा मया विनिर्मिताः, ते च सर्वे मार्जारेण मुषिता इति। तेन सदयमुक्तम्, अलमत्र रोदनेन। श्वोऽन्यं मार्जारं त्वदर्थे क्रेष्यामीति।

गीर्वाण-शब्दस्य व्युत्पत्तिः

[निबन्धकः—श्रीगोविन्दकृष्ण-मोडकः]

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः।

एषा अमरकोशगता पङ्क्तिः कथयति—यत् गीर्वाणः सुरस्य पर्यायोऽस्तीति। अधुना एतद्विचारणीयं—यद् गीर्वाणशब्द एतमर्थं कथं प्राप्नोति इति। अस्य शब्दस्य गिर् बाण इति द्वौ घटकौ विद्येते। अत्र गिर् इति वाचं बोधयति बाण इति च शरम्। बवयोः सावर्ण्यम् इति वचनाद्धि वाणी बाणान्न भिद्यते। एताभ्यां घटकाभ्यां स्वीकृताभ्यामेव समासविग्रहः प्रवर्तते—गीः बाणः यस्य सः। एतेन किं सूच्यते ? देवाः शब्दान् बाणस्थाने प्रयुञ्जते इति। अत्र तु विचार्यमाणे, देवानुद्दिश्य एतद्विपरीतमेव भाति। शस्त्रस्य स्थाने शब्दान् प्रयुञ्जाना मुनयो दृश्यन्ते। तेषां हि प्रायो घोरकर्मसाधनैः शस्त्रैः सह परिचय एव नास्ति। 'शापादपि शरादपि' एतद्वचनं च अधीतशस्त्रमेव ब्राह्मणमुद्दिश्य प्रवर्तते। अत्र ईदृशो द्विजः (१) जात्या शापदानेन संकटं प्रतिकरोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) शस्त्राभ्यासबलेन च आपत्प्रतीकारार्थं शरं व्यापारयति। एतद्वचनं विरलान् द्रोणादीन् धनुर्वेदपारीणान् एव लक्ष्यीकुर्वत् महाभारतादिषु ग्रन्थेषु दृश्यते। एवं सिद्धमेतद् यत् शस्त्रपरिग्रहः द्विजस्य केवलम् असाधारण एव। प्रायेण विप्राः शापबला एव वर्तन्ते। सुराणां पुनः शापरूपमस्त्रं विरलतममेव उपलभ्यते।

एवं सति देवा गीर्वाणपदं कथं लभन्ते? अस्मिन् प्रश्ने विमृश्यमाने अन्यथैव अस्य शब्दस्य घटना चेतसि स्फुरति। सा च गिर्+वनस् इति। एतयोः अर्थौ (१) गिर् इत्यस्य वेदेषु आह्वानम् अर्थः दृश्यते। (२) वनस् इति शब्दश्च इच्छा, अभिलाषः इत्याद्यर्थान् ज्ञापयति। गीः वनः (इच्छा-विषयः, इष्टा) यस्य सः गीर्वनाः। अस्मिन्पदे न-कारेण ण-त्वं प्राप्तेन, तथा च इ-स्वरेण सन्धिशास्त्रप्राप्तं दीर्घत्वम् अप्राप्तेन, गिर्वणाः इति जातं रूपं वेदेषु गोचरीभवति। अस्य विग्रहादेषोऽर्थो लभ्यते—यथा देवा निमन्त्रणं काङ्क्षन्ति। कीदृशं निमन्त्रणम्? अर्थात् यज्ञं प्रति गमनार्थम्, तत्र च हविषो ग्रहणार्थम्। एषः विग्रहोपलब्धोऽर्थः सुरशीलेन संवदत्येव। क्रतुभुजः इति सुरसंज्ञा स्पष्टं ब्रवीति यद् देवाः यज्ञहवींषि भुञ्जते, एतैरेव तेषां वृत्तिः। सर्वश्च स्ववृत्तिसाधनं वस्तु नितरां काङ्क्षेदेव। अतः नात्र किमपि आश्चर्यं यदि देवा मखामन्त्रणानि वाञ्छेयुः, तदुद्दिश्य च निमन्त्रणाभिलाषिण इत्यर्थकं गिर्वणस् इति संज्ञां लभेरन्। अतः, वेदे प्रयुज्यमाना गिर्वणस् इति देवसंज्ञा सम्यगुपपद्यते।

एषा संज्ञा कालक्रमेण लोकेऽपि प्रवृत्ता। तदा लोके रूढः तस्याः समस्तोऽर्थः कथं निष्पद्यते इति व्याकरणप्रवीणान् वर्जयित्वा अन्यैः प्रायः न ज्ञातम्। तेषां हि एतद्घटकयोः वैदिकोऽर्थः अज्ञात एवासीत्। अतः, तैरुत्प्रेक्षितम्—एतद्रूपं प्रायः एकदेशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विकृतं स्यात्। किं पुनः शुद्धं तस्य रूपम् इति जिज्ञासमानानां तेषां गिर्+वाण इति घटना उपपन्ना भाति स्म। अत्र हि वर्त्तमानो वाणशब्दः, वनस् इव, न तेषाम् अपरिचितः। एतौ अवयवौ व्यस्तौ वाचं शरं च क्रमेण बोधयन्तौ, समस्तौ 'शब्देन शस्त्रकार्यं कुर्वाणः' इत्यर्थं बोधयतः। एषोऽर्थः देवानां शीलं कथं सम्यक् बोधयेत् इति चिन्तामकृत्वा तैः एष शब्दः सुरपर्यायत्वेन गृहीतः।

यद्यपि एष समासार्थः भूतार्थेन न सर्वथा संवदति, तथापि अस्य अवयवौ सार्थौ इति विचिन्त्य बुद्धिः तोषमावहति। अस्य पुनस्तोषस्य अवकाशलेशोऽपि गिर्वणस् इति शब्दे तैः न प्राप्तः। एषोऽत्र सारः यत्—समस्तपदस्य यौगिकोऽर्थः विवक्षितार्थेन अभिन्नो भिन्नो वा भवतु। किन्तु यौगिकार्थेन अवश्यं भाव्यमेव। तेन खपुष्पेणेव सर्वथा अनुपलभ्येन न भाव्यमिति। अर्थस्य अभावात् यः कोऽप्यर्थो वरम्—इति जनसंमतं दृश्यते।

एषा विचारसरणिराधुनिकीषु अपि भाषासु प्रतिभाति। माहाराष्ट्र्यां लज्जाहोम, शान्तवन, महशूर इत्यादयो बहवः शब्दा वर्तन्ते। एतेषाम् आद्यः लाजहोम इति शब्दस्य अबुद्धिपूर्वा विकृतिः। तथा हि लाज-शब्दः 'भृष्टयव' इत्यर्थकः संस्कृतानभिज्ञानां जनानामपरिचितः, लाज-शब्देन अंशतः समानाकारश्च लज्जाशब्दोऽस्ति। लाजहोमः विवाहे वर्तते। तस्मिन्क्रियमाणे नवोढा वरस्य सन्निहिता वर्तते। एतत्सान्निध्यं वधूलज्जायाः सद्भावं सूचयति। एतेनोपलक्षितो होमः अनर्थज्ञैः जनैः लज्जाहोमः अभिहितः चेत्, किं तत्र विपरीतम्? एवम् अगृहीतावयवार्थस्य लाजहोमस्य गृहीतावयवार्थं लज्जाहोम इति विकृतं रूपं लोकैः कल्पितं प्रवर्तितं च। अधुना लोकेषु लज्जाहोम इति पदं सर्वत्र रूढं दृश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सान्त्वनं नाम दुःखितस्य नरस्य समाश्वासनपरेण वचसा दुःखस्योपशमनम्। एतदभिधेयं शान्तवन इति कल्पिते रूपे जनानां प्रतिभाति। अत्र शान्त इति पदम् अर्थतः उपशमनस्य अनुकूलमेव। एतत् पर्यालोच्य विवक्षितशब्दार्थः तद्गतात् शान्तशब्दात् प्रवर्तते इति कृत्वा सान्त्वन-शब्दः शान्तवन इति रूपेण समस्तो गृहीतः। अस्मिन् ग्रहणे एष गरीयान् दोषो वर्तते। वन-शब्दस्य अर्थः उपशमनेन कथं संसृज्यते? अस्य सम्यगुत्तरं न लभ्यते। तथापि शब्दस्यार्थः तस्यैकदेशात् अंशतोऽपि प्रवर्तते इति पर्याप्तं मत्वा जनैः शान्तवन इति रूपं सान्त्वनस्य स्थाने सर्वत्र उपयुज्यते।

यवनभाषायां मशहूर इति शब्दः प्रसिद्धार्थं गमयन् दृश्यते। एतस्यावयवौ महाराष्ट्रभाषकस्य न कमप्यर्थं बोधयतः। अतः तेन चिन्तितं—प्रसिद्धः इत्यर्थम् एष शब्दः नैव बोधयितुं क्षमः। अतः मूलतः अस्य रूपेण अन्येन भाव्यम्। तच्च रूपं वर्णविपर्ययमूलं महशूर इति स्यात्। अस्मिन् रूपे मह इत्यंशः महत्त्वं सूचयति। एतदर्थकेन महा-शब्देन असौ तुल्यप्राय एव। यः शूरः स प्रसिद्धेर्विषयोऽवश्यमेव भवति। एवं महत्त्वं शूरत्वं च इत्यर्थद्वयं प्रकाशयन् शब्दः प्रसिद्धः इत्यर्थं बोधयितुं सर्वथा अनुकूलः इति गृहीतम्। एवं मशहूर-शब्दः वर्णविपर्ययमासाद्य अवयवार्थबोधनानुकूलं महशूर इति रूपं प्राप्य लोके सर्वत्र प्रवर्तते।

उपरितनं शब्द-व्याख्यानं समासस्य अर्थे कियत् अवयवार्थ-महत्त्वं वर्तते इति सम्यक् प्रतिपादयति। एतेन महत्त्वेन स्वीकृतेन, गीर्वाण-शब्दः गिर्—वनस् एतदवयवघटितस्य गिर्वणस् इति शब्दस्यैव, जनानाम् अवयवार्थपक्षपातित्वेन जातम् विकृतं रूपम् इति विदुषां सम्मतं स्यात् इत्याशास्य विरम्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

काष्ठशब्दादिञ्चि-प्रत्ययः।

अध्यापकः (पञ्चमश्रेण्यामुच्चैर्भाषमाणं मधुसूदनं प्रति)। अरे रे मधो, अरे स्तेन, अरे मलिम्लुच, अरे पाषण्ड, अरे षण्ड, अरे नास्तिक, अरे चार्वाक, किमिति पाठकाले कोलाहलः क्रियते ?

छात्रः। (सानुनयम्) आर्य ! न खलु कोलाहलः। इदानीं सुमनोहरं सवाक्चित्रमागतमिति सतीर्थ्याय निवेदयन्नहमासम्।

अध्यापकः। अरे दुर्वृत्त ! अरे दग्धवदन ! किं न जानासि मूढ ! "छात्राणामध्ययनं तपः" इति। सवाक्चित्रे प्रदर्शितानि निर्मर्यादानां नराणां स्वेच्छाचारिणीनां च नारीणामाचरितानि सुकुमारमतीनां छात्राणां मानसे, नवे इव भाजने रेखापातः, सुदृढतया संसक्तानि भवन्ति। अतो विषवत् परित्याज्यानि सवाक्चित्राणि। भवतु। इदानीं सुकठिनं किमपि पृच्छामि त्वाम्। अथ समीचीनमुत्तरं दातुं समर्थोऽसि सहिष्ये त्वत्कृतमपराधम्, विपर्यये तु बेञ्चेरुपरि दण्डायमानः स्थास्यसि। आं बेञ्चिशब्देन स्मारितोऽस्मि। बेञ्चि-शब्दस्य तावत् प्रकृतिप्रत्ययौ निरूपय।

छात्रः। मर्षयतु मर्षयतु भवान्। न खल्वितः परं पुनरपि सवाक्चित्राणि द्रक्ष्यामि। प्रश्ने तु भवतां लेशतोऽपि काठिन्यं नास्ति। को वा न जानाति काष्ठशब्दाद् * इञ्चि-प्रत्ययेन * बञ्चिशब्दो निष्पन्न इति। पृषोदरादित्वादभिमतरूपसिद्धिः।

---

* आङ्लभाषातः bench-शब्दो बेञ्चिरूपेण वङ्गभाषायां परिगृहीतः, inch-शब्दश्च इञ्चि-रूपेण।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यापकः (भक्तिरसाप्लुतः)। वत्स, कस्त्वम् ? कस्त्वं वत्स ? नूनं त्वं ध्रुवो वा प्रह्लादो वाश्विनीकुमारयोरन्यतरो वा मां छलयितुं मर्त्यलोकमुपागतः। न खलु प्राकृते बाले सम्भवतीदृशः शेमुषीप्रकर्षः।

प्राकृतेषु कथं वा स्यादस्य ज्ञानस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

अधुना भवानेव मे गुरुपदवीमुपारूढः। शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।

छात्रः (पर्याकुलः) अलमलमावेगेन। भगवन् किमिति गुरुत्व-विपरीतमनुष्ठीयते।

अध्यापकः। मा मैवम्। यथार्थमार्गप्रदर्शनाद् भवन्त एव मे गुरवः। आबाल्यमहर्निशं शास्त्रमधीतवानस्मि, परं वेञ्चि-श-दस्ये-दृशं सुसमीचीनं निर्वचनं क्वापि नावलोकितं न वा स्वप्नेऽपि सम्भावितम्। विश्रवस्-शब्दादणि कथं रावण-शब्दो निष्पद्यते, कथं वालवाय-शब्दः ष्यञ्-प्रत्यय-परिमण्डितो वैदूर्यरूपं परिगृह्णाति इत्यालोचयता कियान् वा क्लेशो न विसोढः, कति वा विनिद्रा रजन्यो नातिवाहिताः। अद्य भवतः प्रसादेन निरस्तं निखिलं तमः, संवृत्तमवदातं सर्वम्। काष्ठशब्दादिञ्चि-प्रत्ययेन वेञ्चिः सञ्जायते इति प्रत्यक्षत एव परिदृश्यते, नास्ति च दृष्टेऽनुपपन्नं नाम। केन वा न दृष्टं तष्टा काष्ठमिञ्चिशः परिमाय वेञ्चिं निर्मिमीत इति। समानन्यायेन वालवायशब्दात् ष्यञि वैदूर्यम्, विदूरो वालवायो हि वैदूर्यमणेः प्रभव इति, विश्रवस्-शब्दादणि रावण इति च, यो हि स्वयं श्रवणाभ्यां हीनः स परेषां श्रवणक्लेशमविगणय्य भृशं विरुया-दित्यत्र किं वा चित्रम्। एवमेव चोर-शब्दाण्णिज-प्रत्ययेन वणिक्-सम्पन्नः, यो हि निजमनीषिकया चोरयति स एव वणिगिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यपदिश्यते। एवमेव कुत्सिततण्डुलादनप्रत्यये ration सम्पन्नम्, रेशनापणेषु हि कुत्सिततण्डुलानां समृद्धिः सन्दृश्यते। एवमेव सुन्दरीशब्दाद्दानी-प्रत्यये पत्नी सम्पद्यते, सर्वैर्हि सुन्दर्येव पत्नीरूपेण गृहमानेतुमिष्यते, सर्वनाश-शब्दादिष्टप्रत्यये communist सम्पद्यते, सर्वनाशो हि तेषामिष्ट एव, सर्वस्वशब्दाच्च निप्रत्यये attorney अभिनिष्पद्यते। Attorney-पदवाच्यैर्व्यवहाराजीवैः कति वा न सर्वस्वग्रहणपूर्वकं भिक्षुकत्वमापादिताः। अत एव वङ्गीयैर्नर्मणोच्यते—"आय् तोर् नि" (आगच्छ गृह्णामि त्वदीयम्) इति attorney, यथा इति ह आस इति इतिहास इति। (क्रमशः)

व्याकरण-विमर्शः

(२)

[निबन्धकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अनर्घराघवटीकायां रुचिपतिना "चौ श्रमः" इति महाभाष्यवचनबलेन, विपूर्वाच्छ्राम्यतेर्घञि वृद्धिः साधिता। महाभाष्ये तु क्वापि श्राम्यतिरेव नोपलभ्यते, का वार्ता विपूर्वकस्य तस्य। दुर्घटवृत्तिकृतोक्तम्—"अनाचमिकमिवमीनाम् इत्यत्र केचिच्छ्रमिवमी पठन्तीति रक्षितः" इति। महाभाष्ये त्वेतन्न दृश्यते, भाष्यटीकाकृद्भिरप्येतन्नोल्लिखितम्। परमेतच्चन्द्रस्याभिमतमिति प्रतिभाति। किञ्चैतस्याभ्युपगमे विश्रामशब्दस्य साधुत्वेऽपि प्रामाणिकप्रवरैर्बहुशः प्रयुक्तस्य विश्रमशब्दस्यासाधुताऽऽपद्यते। अत एव भाष्य-व्याख्यायां कैयटेन विस्पष्टमेवोक्तम्—विश्रामशब्दस्त्वसाधुरेव इति।

माधवेनापि 'श्रमु तपसि खेदे च' [४।९६] इत्यत्रोक्तम्—"अत्र वर्धमानो नोदात्तोपदेश इति वृद्धिनिषेधे ज्ञाते प्रयोगदर्शनाद् वा श्रमेर्वृद्धिमाह। तत् अनाचमिकमिवमीनामिति वक्तव्यम् [७।३।३४ भाष्यम्]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति चम्यादीनामेव भाष्यवार्त्तिकयोर्वृद्ध्यङ्गीकारात्, 'कथं सूर्यविश्रामभूः इति। एवमादिकं प्रयोगमन्याय्यमेव मन्यन्ते' इति वृत्तावुक्तत्वाच्च, अयुक्तम्" इति।

कौमुद्यां (स्फुरतिस्फुलत्योर्घञि ३१८५ इत्यत्र) दीक्षितचरणैरुक्तम् विश्राम इति त्वपाणिनीयम् इति। व्याख्यातञ्चैतत् स्वयमेव प्रौढमनोरमायाम्—अपाणिनीयमिति। श्रमेः शुद्धाद् घञि वृद्धेर्दुर्लभत्वादिति भावः। यदि तु धुर्यान् विश्रामय [रघु १। ५४] इत्यादाविव णिचि वृद्धिमाश्रित्य णिजन्तात् "एरच्" [३।३।५६] क्रियते, तदा रूपं सिध्यत्येव। अर्थस्तु भिद्यते इति भावः। वस्तुतस्तु निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिति विवक्षायान्तु न दोष इत्यवधेयम् इति।

स्पष्टीकृतं चैतत् तत्त्वबोधिनीकारेण—अपाणिनीयमिति। श्रमेरुदात्तोपदेशत्वाद् घञि वृद्धेर्दुर्लभत्वात्। यदि तु "धुर्यान् विश्रामयन्" * [रघु १।५४, ४।८५] इत्यादिवण्णिचि वृद्धिमाश्रित्य णिजन्तात् "एरच्" क्रियते, तदा रूपं सिध्यति। न च णिच्यपि वृद्धिनिषेधः शङ्क्यः। "नोदात्ते"त्यत्र 'कृतो'त्यनुवृत्त्या णिचि निषेधाऽऽभावात्। न चैवमपि "मितां ह्रस्वः" [६।४।९२] इति निषेधः स्यादिति शङ्क्यम्, [वा चित्तविरागे इत्यतः] वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणेन ह्रस्वाभावसिद्धेः। परन्तु णिजन्तकल्पनायामर्थो भिद्यत इति भावः। वस्तुतस्तु 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिच्' इति विवक्षायां तु न दोष इत्यवधेयम्। एवञ्च

रोगी चिरप्रवासी परान्नभोजी परावसथशायी।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः॥

---

* धुर्यान् विश्रामय [रघु १।५४] + रजो विश्रामयन् [रघु ४।८५] = धुर्यान् विश्रामयन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[हितोपदेश १।१३२] इत्यादिकविप्रयोगाः साधव एवेति बोध्यम् इति।

दक्षिणावर्तनाथः। विश्रामहेतोः। नोदात्तोपदेशस्य मान्तस्यानाचमेः (७।३।३४) इति प्रतिषेधात् विश्रमहेतोरिति वक्तव्यम्। विश्रामहेतोरित्यस्य रूपसिद्धिश्चन्द्रव्याकरणेनेत्यनुसन्धेयम्।

वल्लभः। विश्रामशब्दः कवीनां प्रमादजः।

मल्लिनाथः। विश्रामेत्यत्र "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति पाणिनीये वृद्धिप्रतिषेधेऽपि "विश्रामो वा" इति चन्द्रव्याकरणे * विकल्पेन वृद्धिविधानाद्रूपसिद्धिः।

सारोद्धारिणी। 'वौ श्रमेः' इति वा दीर्घः।

स्थिरदेवः। "वौ श्रमेः" इति विभाषया दीर्घः।

पूर्णसरस्वती। 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' इति प्रतिषेधाद्विश्रमेति वक्तव्यम्, विश्रामेति रूपसिद्धिर्लक्षणान्तरेणेति ज्ञेयम्।

काशिका। सूर्यविश्रामा भूमिरित्यादिकं प्रयोगमन्याय्यमेव मन्यन्ते। (७।३।३४)

न्यासः। अथ कथं विश्राम इति। न चायमसाधुरिति शक्यते वक्तुम्। यतः सूर्यविश्रामा भूमिरिति प्रयोगो दृश्यते इत्याह—एवमादिकं प्रयोगमिति।

पदमञ्जरी। अन्याय्यमेव मन्यते इति। विश्रान्तिभूमिरिति† पठितव्यमित्यर्थः इति। तेन विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुरिति [शाकुन्तल २।६] व्याख्यातम्।

---

* चन्द्रव्याकरणे किमपीदृशं सूत्रं नोपलभ्यते। जैनेन्द्रव्याकरणे पुनर्विश्रमो वा (५।२।४१) इति सूत्रं वर्तते एव। मञ्जूषायाश्चतुर्थवर्षस्य प्रथमसंख्यायाः १५ पृष्ठं द्रष्टव्यम्।

† मूले 'सूर्यविश्रामभूमि'रिति समस्तपाठो हरदत्तस्य सम्मतः। हैमानुशासनबृहद्वृत्तावपि स एव पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्त्रप्रदीपः। विश्रामशब्दमसाधुं मन्यन्ते। तथाच भागवृत्तिकारोऽपि विश्रमशब्दस्य साधुत्वमुक्तवान्। "विश्रमार्थमुपगूढमजस्रम्......" इति च माघः [१०।८८]। यथा चान्द्रं सूत्रम् – "मः सेटोऽनाचमिकमिविश्रमः"* इति तथा विश्रामशब्दः साधुरेवायमिति लक्ष्यते।

हेमचन्द्रबृहद्वृत्तिः। विश्रमेर्वा ४।३।५६

विपूर्वस्य श्रमेर्ञ्णिति कृत्प्रत्यये ञौ च परे वा वृद्धिर्न भवति। विश्रामः विश्रमः। सूर्यविश्रामभूमिः। अविश्रमं यावदिदं शरीरम्। विश्रामकः। विश्रमकः। व्यश्रामि। व्यश्रमि। वीति किम्? श्रमः श्रमकः अश्रमि। कृञ्ञावित्येव। विशश्राम। अन्ये तु विश्रमेर्वृद्धिं नेच्छन्त्येव। अपरे तु नित्यमेव वृद्धिमुपयन्ति। एके तु घञ्येव विकल्पमातिष्ठन्ते।

लीबिश्महोदयेन मुद्रितायां क्षीरतरङ्गिण्यां दृश्यते—"विश्रामः। विश्रमोऽपीष्टः" इति। अत्र ह्रस्वदीर्घयोर्विपर्यासः संवृत्त इति प्रतिभाति। "विश्रमः। विश्रामोऽपीष्टः" इति शुद्धपाठ इति प्रतीयते।

कालिदासस्य सूक्तयः

(२)

भवानपीदं परवानवैति
महान् हि यत्नस्तव देवदारौ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे
विनाश्य रक्ष्यं स्वयमक्षतेन॥ रघु २।५६

* मः सेटो नावम्यमिक्रमाचमविश्रमः ६।१।४२इति मुद्रितचान्द्रव्याकरणे पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"You, too, who are a servant know this—since you take so much care of the Devadāru—one cannot stand before one's master, sound in limbs, after having allowed one's charge to perish."

सम्बन्धमाभाषणपूर्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्वनान्ते ।
तद् भूतनाथानुग नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम् ॥ रघु २।५८

"Friendship follows conversation" say the sages. And it has sprung up between us two who have met together (and conversed) in this forest. Therefore, O attendant of S'iva, you should not refuse this request of me, a friend.

अथोपनीतं विधिवद् विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते
क्रिया हि वस्तूपहिता प्रसीदति ॥ रघु ३।२९

'Then he was duly invested with the sacred thread and the preceptors taught him, their favourite. And their efforts were not in vain in this matter, for labour bestowed on a worthy object bears fruit.'

[नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत् ।
न व्यापारशतेनापि शुकवत् पाठ्यते बकः ॥ हितोपदेशः

'No labour bestowed on an unworthy object can ever bear fruit. A heron cannot be made to speak like a parrot even with a hundred efforts !'

क्रिया हि द्रव्यं विनयति नाद्रव्यम् ।
कौटिल्यार्थशास्त्रम्

पार्थिवत्वे तुल्येऽपि मणेर्बिम्बोद्ग्राहिता न लोष्टादीनाम् ।
भामती १।१।-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च तयोर्भूयान् भेदः फलं प्रति तद् यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥

उत्तररामचरितम् २।४

"The teacher gives instruction as to the clever so to the dullard, but he does not produce or take away in the case of either the power of acquiring knowledge, and there is a great difference between them with respect to results: that happens in the same way as a pure jewel is able to receive reflection, and a clod of clay is not." TAWNEY.

प्रायः सन्त्युपदेशार्हा धीमन्तो न जडाशयाः ।
तिलाः कुसुमसौगन्ध्यवाहिनो न यवाः क्वचित् ॥

दृष्टान्तशतकम् ।

'It is persons of intelligence and not dullards that are generally the fit and proper objects of instruction. Sesamum carries the fragrance of flowers and not barley-corn'.]

तदङ्गमग्र्यं मघवन् महाक्रतो-
रमुं तुरङ्गं प्रतिमोक्तुमर्हसि ।
पथः श्रुतेर्दर्शयितार ईश्वरा
मलीमसामाददते न पद्धतिम् ॥ रघु ३।४६

'It behoves thee, therefore, O Indra, to give us back the steed which forms the principal material of the great sacrifice. Great men who are the guides to the path chalked out in the Vedas never have recourse to the path of the unrighteous.'

यशस्तु रक्ष्यं परतो यशोधनैः । रघु ३।४८

'Those to whom their glory is the only treasure owe it to themselves to preserve this glory from their enemies.'

तथा हि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुतोष वीर्यातिशयेन वृत्रहा
पदं हि सर्वत्र गुणैर्निधीयते ॥ रघु ३।६२

'The slayer of Vṛtra (Indra) was pleased with the superior prowess of the prince who still persisted in his hostile attitude cruelly characterised by the exchange of missiles, for merits secure a footing everywhere.'

अपनीत-शिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपात-प्रतीकारः संरम्भो हि महात्मनाम् ॥ रघु ४।६४

'The rest removed their turbans and threw themselves on his mercy, for the anger of noble souls is dispelled by submission.'

In the course of his Digvijaya (conquest of quarters) Raghu invaded Persia. Then a fierce battle took place and the earth was honeycombed with the bearded heads of the Persians. The survivors removed their helmets in token of submission and threw themselves on the mercy of the noble victor.

महतां परकीयमौद्धत्यमेवासह्यं न तु जीवितमिति भावः । मल्लिनाथः ।

It is the arrogance of the enemy and not his life that is intolerable to the great.

महती प्रतारणा

गुटिकापातः प्रवृत्तः । तत्र प्रथमः पुरस्कारः साश्वं शकटम् । केनचित् कृषीवलेन प्रथमोऽयं पुरस्कारो लब्धः । नूनमयमतिमात्रं हृष्टः स्यादिति तस्य सखिभिर्मन्यते स्म । स पुनः पुरस्कारे निहित-दृष्टिर्नितरां भीषणदर्शन आसीत् । तद् दृष्ट्वैकेन पृष्टम्—किमप्यन्यथा संवृत्तं वेति । तेन रोषारुणनयनेनोक्तम्—वञ्चनमेवैतत् सर्वम् । कशा मे तैर्मुषितेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शान्तिः

धूमशकटस्य कक्षे समुपविष्टयोर्महिलयोर्मध्ये गवाक्षमधिकृत्य प्रादुर्भूतो विवादः। तत्रैकयोक्तम्, गवाक्षं रोद्धव्यम् इति, अपरयोक्तं गवाक्षं मोक्तव्यमिति। अन्ततश्चारक्षिकपुरुषः समाहूतः। तस्य पुरत एकयोक्तम्—गवाक्षं रुद्धं चेत् श्वासरोधेनाहं मरिष्यामि इति। अपरया चोक्तं गवाक्षं मुक्तश्चेत् कासरोगेणाहमुपरंस्य इति। आरक्षिकपुरुषश्च प्रतिपत्तिमूढः स्थितः। ततोऽनलायमानयो रमण्योर्मध्येऽवस्थितेन नितरां मृदुनैकेन पुरुषेणोक्तम्—भद्र, आदितस्तावद् गवाक्षं रुद्ध्वा प्रथमां श्वासरोधेन मारय, ततो गवाक्षं मुक्त्वा द्वितीयां कासरोगेण नाशय, तत ऊर्ध्वं शान्तिराविर्भविष्यतीति।

पाठ-विमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

ऋग्वेदीय-१।४८।१-मन्त्रस्य सायणभाष्ये दृश्यते—"दुहितर्दिवः। सुबामन्त्रिते पराङ्गवत् स्वरे इत्यत्र 'परमपिच्छन्दसि' इति वचनात् दिवः इत्यस्य पूर्वाङ्गवद्भावे सति आमन्त्रितस्य च इति षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तम्" इति। अत्र 'षष्ठ्यामन्त्रितसमुदायस्य' इति पाठः शुद्धो वा इति पृच्छति कश्चन जिज्ञासुः। तत्रोच्यते—

अत्र 'षष्ठ्यामन्त्रितसमुदायस्य' इति पाठः साधुरेव। षष्ठ्यन्तस्य पदस्य च आमन्त्रितस्य च इत्युभयस्य इति तस्यार्थः। शचसस्पते [ऋ सं १।११।१] इत्यत्र भाष्यकृद्भिर्विस्पष्टमेवोक्तम्—सुबामन्त्रितपराङ्गवद्भावेन पदद्वयनिघात इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यच्च ऋसं-१।२६।१-मन्त्रव्याख्याने म्याक्स्-मूलर्-मुद्रित-पुस्तके—ऊर्जां पते। सुबामन्त्रित इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितस्य* समुदायस्याष्टमिको निघात इत्युपलभ्यते, तत्र षष्ठ्यामन्त्रितसमुदायस्येति समस्तपाठो न समीचीनतया प्रतिभाति। तथाहि—तस्यैव सूक्तस्यान्तिममन्त्रगतं "सहसो यहो" इति पदद्वयं व्याचक्षाणैर्भाष्यकृद्भिरुक्तम् सहसो यहा इति सुबामन्त्रित इति पराङ्गवद्भावादामन्त्रितस्य चेति षष्ठ्यामन्त्रितसमुदायो निहन्यते" इति। १।२९।२-व्याख्यानेऽपि सुबामन्त्रित इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायनिघात इत्युपलभ्यते। १।३०।२२-मन्त्रभाष्येऽपि दृश्यते—"दुहितर्दिवः। परस्यापि दिव इत्यस्य दिवो दुहितरित्यन्वये सति पूर्ववत्त्वात् सुबामन्त्रिते इति पराङ्गवद्भावेन षष्ठ्यामन्त्रितसमुदायस्य सर्वानुदात्तत्वम्। यद्वा "कार्यकालं हि संज्ञापरिभाषम्" इति न्यायेन "सुबामन्त्रिते" इत्यस्य "आमन्त्रितस्य च" इत्याष्टमिकेन योगेनैकवाक्यत्वे सति परत्वात् पराङ्गवद्भावे सति सर्वानुदात्तत्वम्। कृतस्वरयोः षष्ठ्यामन्त्रितयोः पश्चाद् "व्यत्ययो बहुलम्" इति व्यत्ययस्तत्प्रयोगः।" इति।

(क्रमशः)

---

* षष्ठी च आमन्त्रितं च तयोः समाहारः षष्ठ्यामन्त्रितम्। सर्वो द्वन्द्वो विभाषैकवद् भवतीति परिभाषया समाहारः। इति कथञ्चित् साधुत्वं साधयितुं शक्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशः शरणम् ।

श्रीशङ्कराचार्यकृतसच्चिदानन्दानुभवप्रदीपिका ।

[लेखकः—श्रीरघुनाथकृष्ण-पाटणकरः]

श्रीभगवत्पूज्यपाद-श्रीमच्छङ्कराचार्यविरचितोऽयं ग्रन्थो न क्वापि दृष्टपूर्वः। १५७८—१६०९ शकसमये विद्यमानानां पण्डित-प्रकाण्डानां सर्वतन्त्रस्वतन्त्राणां नैकग्रन्थप्रणेतॄणां घाटोपाह्वरघु-नाथशास्त्रिणां राजपुरनिकटवर्तिनां हर्डीग्रामनिवासिनामद्यापि तत्रैव समाधिसुखमनुभवतां स्वीयकरमुद्रितः, अतोऽब्दशतत्रयादपि प्राचीने काले विलिखितः। विषयप्रतिपादनशैल्यां नयनसरणि-मारूढायां ग्रन्थोऽयं श्रीभगवत्पूज्यपादानां श्रीशङ्कराचार्याणामेवेत्यत्र न कोऽपि सन्देहलेशः समुन्मिषति।

"पञ्चप्रकरणामेताम्" इति समाप्तिश्लोकः पञ्चमस्य प्रकरण-स्यान्तिमः श्लोक इति मूललिखितग्रन्थेऽस्ति। अग्रे "इति श्रीसच्चिदा-नन्दानुभवप्रदीपिकायां पञ्चमं प्रकरणम्" इत्यलङ्कृतिः। तथापि प्रकृतप्रतिमायां यथास्वम् "इति श्री...प्रकरणम्" इत्यलङ्कृतेरनन्तरं निवेशितम्। एवमन्योऽप्येकः श्रीशङ्कराचार्य-प्रणीतः "सन्न्यास-कृत्यम्" इति ग्रन्थः क्वाप्यन्यत्रानवलोकितोऽत्र विद्यते। तस्यापि परिचयो जिज्ञासुभ्यो यथाकालं प्रतिपादयिष्यत इति सकलं शिवम्। १८७१ ज्येष्ठकृष्णसप्तम्यां भृगुवासरे विहितम्।

॥ श्रीशः शरणम् ॥

श्रीमच्छङ्कराचार्य-विरचिता

सच्चिदानन्दानुभवप्रदीपिका ।

ॐ नमः परमात्मने ॥

शिवः सर्वं शिवः सर्वं शिवः सर्वं पुनः पुनः ।
वचः शिवमयं ज्ञेयं वक्ता वाच्यं च तन्मयम् ॥ १ ॥
यत्सुखं सच्चिदाकारं मायातीताद्वयध्रुवम् ।
तदेवाहं परं ब्रह्म कं भजामि स्मरामि कम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगद्रूपस्य यः साक्षी स आत्मा स शिवो हरिः ।
जगद्रूपविचारोऽयं क्रियते तत्त्वतो मया ॥ ३ ॥

सत्त्वं भानं प्रियत्वं च जगतो नामरूपकम् ।
आद्यत्रयं भवेद् ब्रह्म नाम रूपं विशिष्यते ॥ ४ ॥
त्रये पातद्वयं ग्रस्तं तत् त्रयं त्वेकरूपकम् ।
अतः सर्वं चिदाकारं वाचातीतं निरञ्जनम् ॥ ५ ॥

अयमेव महायोगो भानमात्रं जगद् भवेत् ।
पुनः पुनस्तदस्मृत्या परानन्दः प्रकाशते ॥ ६ ॥

भानाभावनिरासे तु यन्मनश्चित्सुखात्मकम् ।
मुनयो ध्यानवेत्तारस्तद्ध्यानं सम्प्रचक्षते ॥ ७ ॥

आदित्यस्योदयो यद्वज्जायते नाशयंस्तमः ।
वायुं विनाशयन्नेव जायते चित्सुखोदयः ॥ ८ ॥
अभ्यासवशगः प्राणः साक्षात्तद्धानमुच्यते ।
तत्कर्म स परो धर्मस्तस्माद् भेदो न विद्यते ॥ ९ ॥
परानन्दप्रकाशे तु प्राणस्याकर्षणं भवेत् ।
प्राणस्याकर्षणे जाते ह्यपानाकर्षणं भवेत् ॥ १० ॥
अपानाकर्षणे जाते महानग्निः प्रवर्तते ।
अग्निना परितप्ता तु शक्तिः कुण्डलिनी परा ॥ ११ ॥
उत्थिता लिङ्गमूलेन प्रयाति ब्रह्मरन्ध्रकम् ।
भेदयन्ती च षट्चक्रीं ग्रन्थित्रयविभेदतः ॥ ११ ॥
शिवेन चैकता भूता परमानन्दवर्षिणी ।
ततः शिवमयं सर्वं जायते नात्र संशयः ॥ १३ ॥
पूर्वोक्तेन प्रकारेण प्राणापानादिकं च यत् ।
तत्सर्वं भानमात्रं स्यान्नात्र कार्या विचारणा ॥ १४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं निरन्तरं पुंसः पश्यतः स्वात्मचक्षुषा ।
आत्मलाभो भवेत्तस्य सत्यं सत्यं मयोदितम् ॥ १५ ॥

इति श्रीसच्चिदानन्दानुभवप्रदीपिकायां प्रथमं प्रकरणम ।

ऐकाग्र्यं मनआदीनामिन्द्रियाणां परन्तप ।
तज्ज्यायान्सर्वधर्मेभ्यः स धर्मः स्मर्यते परः ॥ १ ॥
ऐकाग्र्यं परमं प्राहुः सर्वत्र ब्रह्मदर्शनम् ।
अखण्डैकरसं ब्रह्म द्रष्टव्यं तेन चक्षुषा ॥ २ ॥
चक्षुषश्चक्षुरित्यादिः श्रुतिर्भवति निश्चिना ।
तस्मात्सर्वप्रयत्नेन चित्सुखं संस्मरेत् सदा ॥ ३ ॥
स्मरणं तेन रूपेण मनसो मनआदितः
तदखण्डं ब्रह्म परं परिपूर्णं चिदात्मकम् ॥ ४ ॥
साक्षिणं सर्वभूतानामन्तः पश्यन्तमेव सः ।
सद्यस्तद्दर्शनादेव परानन्दः प्रकाशते ॥ ५ ॥
अन्तर्योगे बहिर्योगे विशेषो नास्ति तत्त्वतः ।
सच्चिदानन्दरूपोऽहं शिवः सर्वमयो यतः ॥ ६ ॥
दृश्यास्तित्वाद् धृतो बन्धस्तदभावे विमुक्तिदः ।
अविद्या मूलमेतस्य भाति सा चिन्मयी यतः ॥ ७ ॥
गन्धर्वनगराकारं जगदेतच्चराचरम् ।
आत्मतत्त्वं सदा शुद्धं स्वसंवेद्यं नभोपमम् ॥ ८ ॥
शिवादेव समुत्पन्नं शिवे च प्रविलीयते ।
शिवेन भासते तस्मात् कोलाहलोऽपि तन्मयः ॥ ९ ॥
यदा प्रकाशते विश्वं बोधमात्रतया स्थितम् ।
यदा प्रकाशते तत्तु बोधमात्रं तदा स्थितम् ॥ १० ॥

इति श्रीसच्चिदानन्दानुभवप्रदीपिकायां द्वितीयं प्रकरणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्पर्शयोगं वक्ष्यामि शुद्धज्ञानमयं शिवम् ।
यत्र वेदचिदां वाणी वर्तते लक्षणावशात् ॥ १ ॥
कदाचिदपि संस्पर्शो द्वितीयस्य न विद्यते ।
अस्पर्शयोगो नामैष कथ्यते ब्रह्मवादिभिः ॥ २ ॥
परस्परविरोधेन क्षीयन्ते द्वैतवादिनः ।
अजातिर्जगतो जाता जातेरप्रतिपादनम् ॥ ३ ॥
ज्ञानस्यालम्बने सत्त्वं कारणस्य विचारणात् ।
कारणस्य विचारेण पूर्णब्रह्मावशिष्यते ॥ ४ ॥
चिदानन्दात्मकं सर्वं यत् किंचिद् दृष्टिगोचरम् ।
परिपूर्णं परं ब्रह्म विश्वातीताद्वयं समम् ॥ ५ ॥
समाधिर्वाऽसमाधिर्वा मनसो मे न तत्त्वतः ।
स्वप्रकाशस्वभावत्वान्नाहोरात्रं यथा रवेः ॥ ६ ॥
साधनं स्यादसिद्धस्य स्वतःसिद्धस्य किं भवेत् ।
अज्ञाननाशनादेव चिदानन्दो भवेत् सदा ॥ ७ ॥

इति श्रीसच्चिदानन्दानुभवप्रदीपिकायां तृतीयं प्रकरणम् ।

ब्रह्मानन्देन यो योगी न बिभेति कुतश्चन ।
शोकादीनामनुत्पत्तेरुत्पत्तेस्तस्य किं भवेत् ॥ १ ॥
पद्मिन्याः पतिते पत्रे न स्पृशेदुदकं यथा ।
जाग्रत्स्वप्नसुषुप्त्यादि चिन्मयं न स्पृशेत्तथा ॥ २ ॥
अज्ञानं तु धियो धर्म आत्मा शुद्धः स्वयंप्रभः ।
जानाति सा शिवमयं बुद्धिरेव न विद्यते ॥ ३ ॥
परिपूर्णेऽद्वितीयेऽस्मिन् क्व चित्तं क्व च वा रतिः ।
क्व सुखं क्व च वा दुःखं चलनं वा क्व विद्यते ॥ ४ ॥
एकमेवाद्वितीयं सन्नेह नानास्ति किञ्चन ।
इत्यादिश्रुतिराख्याति विद्वद्भिः सुष्ठु निश्चितैः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमात्मविदः सत्यं निश्चितं प्रवदन्ति हि ।
तस्मादात्ममयं सर्वं नात्र कार्या विचारणा ॥६

इति श्रीसच्चिदानन्दानुभवप्रदीपिकायां चतुर्थं प्रकरणम् ।

पापपुण्यादिकं सर्वं मया कृतमिदं मुधा ।
कार्यं तु कारणादन्यन्न भवेदिति निश्चितम् ॥ १ ॥
अतः सर्वमिदं किञ्चित् क्रियते साध्वसाधु वा ।
अहमेव भवेत् कार्यं कारणत्वं न तत्त्वतः ॥ २ ॥
लोकेऽपि हि प्रसिद्धैषा न तन्तुभ्योऽन्यथा पटे ।
मृत्तिकैव यथा भाण्डे कनकं कुण्डले यथा ॥ ३ ॥
अग्नौ यत्तद् ध्रुवं सर्वमग्निरेव भवेद्यथा ।
वेत्ता च विदितं वेद्यं संविदेव भवेत्तथा ॥ ४ ॥
अप्सूत्थः सैन्धवघनो ह्यप्स्वेवानुविलीयते ।
वेद्यं वेदनसंसर्गात् संविदेव भवेत्तथा ॥ ५ ॥
कर्पूरो दीपसंसर्गाद्दीप एव भवेद्यथा ।
वेद्यं वेदनसंसर्गात् संविदेव भवेत्तथा ॥ ६ ॥
गङ्गायां जायमाना ये तरङ्गास्तेऽन्यथा यथा ।
चिदानन्दे तथा जातास्तस्मादद्वैतता शिवा ॥ ७ ॥
सुखचित्सत्तया ग्रस्ताः कल्पनासात्स्वरूपकाः ॥
काशतेऽस्ति प्रिया या या स्तस्मादद्वैतता शिवा ॥ ८ ॥

इति श्रीसच्चिदानन्दानुभवप्रदीपिकायां पञ्चमप्रकरणम् ॥ ५ ॥

पञ्चप्रकरणामेतां ये पठन्डि पुनः पुनः ।
सत्सुखानुभवस्तेषां भवेदिति सुनिश्चितम् ॥

॥ इति श्रीमच्छङ्कराचार्यविरचिता सच्चिदानन्दानुभवप्रदीपिका ॥
घाटोपनामकमहादेवभट्टात्मजरघुनाथस्येदं पुस्तकम् ॥
शुभं भवतु ॥ श्रीरामः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কলিকাতা বিশ্ববিদ্যালয়ের অধ্যাপক

শ্রীক্ষিতীশচন্দ্র চট্টোপাধ্যায়, এম. এ. ডি. লিট্ প্রণীত

শব্দ-কথা

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে। **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া,** বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোত-শব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম ত'র পর আছে, না দ্বিতীয় ত'র পর আছে, না উভয় ত'র পর আছে, সঠিক শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, চন্দ্রমাঃ, পূর্ণিমা ও অমাবস্যা শব্দের ব্যুৎপত্তি কি, লাবণ্যলালিম মুখমণ্ডল কমনীয় কিনা, অনীতা, নমিতা, ইভা, জিগেন্দ্র প্রভৃতি নামগুলির অর্থ কি প্রভৃতি নানা বিষয় আলোচিত হইয়াছে। সোনার পাথর বাটী প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী, গ্রীক্, লাটিন্, জার্মান প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। সন্ধির কথায় সন্ধির বৈজ্ঞানিক ব্যাখ্যা ইংরাজী, লাটিন ও আরবী ভাষায় সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব, ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে। বাঙ্গালা, ইংরাজী ও সংস্কৃত ভাষায় অধ্যাপক ও ছাত্র, সাহিত্যিক, সাংবাদিক প্রভৃতির পক্ষে এই গ্রন্থ অত্যাবশ্যক।

মূল্য দুই টাকা মাত্র

উষার আলো

ইহাতে দেশ-বিদেশে প্রচলিত হাস্যরসাত্মক কৌতূহলোদ্দীপক অথচ শিক্ষাপ্রদ শতাধিক ছোট গল্প সন্নিবিষ্ট হইয়াছে। পড়িতে পড়িতে হাসিয়া অস্থির হইতে হইবে। **মূল্য বার আনা মাত্র**

নক্ষত্রমালা। শ্রেষ্ঠ শ্লোকসমষ্টি, ব্যাখ্যা ও অনুবাদ। মূল্য পাঁচ আনা মাত্র

শ্রীবিশ্বনাথ চট্টোপাধ্যায়

৬১, শ্যামবাজার ষ্ট্রীট, কলিকাতা—৪।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;

Formerly Editor, Calcutta Oriental Journal,

Surabharati, Oriental Literary Digest, etc., etc.

It is a unique work dealing with and throwing a flood of light on the technical terms found in the Nirukta, different Pratiśākhyas and Pāṇini, Kātantra, Candra, Jainendra, Śākaṭāyana, Hemacandra, Saṃkṣhiptasāra, Mughdabodha, Sārasvata, Supadma, Prayogratnamālā and Harināmāmṛita systems of Sanskrit Grammar.

It offers for the first time rational explanations of even such apparently meaningless terms as laṭ, ghi, ghuṭ, bha.

It gives reasons for the use of particular letters as Anubandhas by Pāṇini and his successors.

It contains many charming poems about these technical terms with their English translations.

No serious student or teacher of Sanskrit or Philology can afford to do without the book.

The book is priced at Rupees Ten and will be sent per Regd. Post on receipt of Rs. 10/8/- (Foreign Rs. 12/8/-) by Money Order.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4.

Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press. 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४र्थं-वर्षं　　　　　　　　　　　　　　　　सख्या ३

मञ्जूषा

संस्कृतभाषामयी मासिक-पत्रिका

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

पौषसंख्यायाम्

आख्यानिकप्रवर-मूर्धन्यस्य-शरच्चन्द्र-चट्टोपाध्यायस्य "निष्कृतिः", महामहोपाध्याय-रघुनाथशास्त्रिणः 'पृच्छाया उत्तरम्', बङ्किमचन्द्र-चट्टोपाध्यायस्य "व्याघ्राचार्य-बृहल्लाङ्गूलः", ऋग्वेदान्तर्गतोष:-सूक्तस्याभिनवं भाष्यम्, अप्पशास्त्रिराशिवडेकरस्य

संस्कृतभाषामयाणि पत्राणि

अन्ये च निबन्धाः प्रकश्येरन्

If you want to learn Sanskrit without tears, if you want to get acquainted with all that is best in Sanskrit literature and Indian culture, if you want to keep abreast of Indological research, you must subscribe to the MANJUSHA. The commentary on the Uṣā-hymns, the Gāthās with Sanskrit translation, the Mahābhāṣya with English translation and notes, ancient inscriptions, Notes and Queries, letters in Sanskrit, proverbs and maxims from the different Indian and European languages are some of the special features of the MANJUSHA.

Office : 81 Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Foreign : Rupees Eight.

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA—Old Volumes

A few sets of Manjusha Vols. I, II and III are still available. Price Rupees five for all three volumes. Postage extra.

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्।

२। प्रतिसौरमासं दशमे दिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते; तृतीये भागे सानुवादाः पारसीकानां गाथाः, साङ्लानुवादं महाभाष्यम्, सभाष्यम् ऋग्वेदो मुद्र्यन्ते।

४। सनातन-भारतधर्म-विरुद्धाः प्रबन्धाः कथञ्चिदपि न प्रकाश्येरन्।

५। आपाततः प्रतिमासं द्वात्रिंशत्-पृष्ठात्मिका मञ्जूषा प्रकाश्यते, सति ग्राहकाणां बाहुल्ये पञ्चाशत्-पृष्ठात्मिकापि प्रकाश्येत।

श्रीविश्वनाथ चट्टोपाध्यायः।
८१ श्यामबाजार ष्ट्रीट, कलिकाता ४।
81, Shyambazar Street, Calcutta 4.
Phone: B. B. 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

November, 1949 | १८७१-शाकीयाग्रहायणस्य ४र्थ-वर्षस्य ३य-संख्या | Vol. IV No. 3

उपनिषद्रत्नम्

असतो मा सद् गमय
तमसो मा ज्योतिर्गमय
मृत्यो र्मामृतं गमय।

इति। स यदाह—"असतो मा सद् गमय" इति, मृत्युर्वा असत्, सदमृतम्, मृत्योर्माऽमृतं गमय, अमृतं मा कुरु इत्येवैतदाह। "तमसो मा ज्योतिर्गमय" इति। मृत्युर्वै तमः, ज्योतिरमृतम्, "मृत्योर्मामृतं गमय", अमृतं मा कुर्वित्येवैतदाह। "मृत्योर्मा अमृतं गमय" इति। नात्र तिरोहितमिवास्ति। [बृहदारण्यकम् १।३।२८]

शाङ्करभाष्यम्। मन्त्राणामर्थस्तिरोहितो भवतीति स्वयमेव व्याचष्टे ब्राह्मणं मन्त्रार्थम्—"सः" मन्त्रो "यदाह" यदुक्तवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽसावर्थ इत्युच्यते--"असतो मा सद् गमय" इति। "मृत्युः वै असत्"—स्वाभाविके कर्म-विज्ञाने "मृत्यु"रित्युच्येते। "असत्" अत्यन्ताधोभावहेतुत्वाद्। "सत् अमृतम्"। सत् शास्त्रीयकर्म-विज्ञाने अमरणहेतुत्वात् अमृतम्। तस्मात् असतः असत्कर्मणः अज्ञानाच्च मां मां सत् शास्त्रीयकर्म-विज्ञाने गमय देवभावसाधनम् आत्मभावम् आपादयेत्यर्थः। तत्र वाक्यार्थमाह—"अमृतं मा कुरु इत्येवैतदाह" इति।

तथा, "तमसो मा ज्योतिर्गमय" इति। मृत्युर्वै तमः। सर्वं हि अज्ञानम् आवरणात्मकत्वात् तमः, तदेव च मरणहेतुत्वात् मृत्युः। ज्योतिः अमृतम्, पूर्वोक्तविपरीतं दैवं स्वरूपम्। प्रकाशात्मकत्वाज् ज्ञानं ज्योतिः, तदेवामृतम् अविनाशात्मकत्वात्, तस्मात् तमसः मा ज्योतिः गमय इति। पूर्ववत् मृत्योर्मामृतं गमयेत्यादि। "अमृतं मा कुरु इत्यवैतदाह" दैवं प्राजापत्यं फलभावमापादयेत्यर्थः।

पूर्वो मन्त्रः असाधनस्वभावात् साधनभावम् आपादय इति, द्वितीयस्तु साधनभाधात् अपि अज्ञानरूपात् साध्यभावम् आपादय इति [आह]। "मृत्योः मा अमृतं गमय" इति पूर्वयोरेव मन्त्रयोः समुच्चितोऽर्थः तृतीयेन मन्त्रेण उच्यते इति प्रसिद्धार्थतैव। "नात्र" तृतीये मन्त्रे "तिरोहितम्" अन्तर्हितम् "इव" अर्थरूपम्, पूर्वयोः इव मन्त्रयोः, "अस्ति"। यथाश्रुत एवार्थः।

आभाणकरत्नानि

१। (व) अतिभक्ति चोरेर् लक्षण।

भक्तिः सातिशया लोके चौरस्यैव हि लक्षणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्यादरो भवेद् यत्र कार्यकारणवर्जितः ।
तत्र शङ्का प्रकर्तव्या परिणामे सुखावहा ॥

पञ्चतन्त्र १।४१२

२। Fair words make fools fain.

(ला) Promissis vacuis spes luditur irrita follis.

(ला) Laetificare solet stultum promissio dives.

(ला) Laetificat stultum grandis promissio multum.

(फ) Douces promesses fols lient.

(शा) Schöne Worte machen den Gecken fröhlich.

हृष्यन्ति मूढा मधुरैर्वचोभिः ।
मधुराणि वचांसि मूढान् मोहयन्ति ।

३। (व) चाकेर मधु मिष्टि ह'त ।
मौमाछि यदि ना र'त ॥

अभविष्यत् सुमिष्टं हि मधुकोषे स्थितं मधु ।
नावर्तिष्यन्त चेत्तत्र मक्षिका दंशिकाः सदा ॥

४। (व) मरेओ मरे ना से, यदि लोके घोषे ।
वेँचेओ वाँचे ना से, यदि लोके दोषे ॥

मृतो न म्रियते जन्तुर्यदि लोकेन घोष्यते ।
जीवितोऽपि न जीवेत् स यदि लोकेन दूष्यते ॥

कीर्तिर्यस्य स जीवति ।
सम्भावितस्य चाकीतिर्मरणादतिरिच्यते ॥

गीता २।

स जीवति यशो यस्य कीर्तिर्यस्य स जीवति ।
अयशोऽकीर्ति-संयुक्तो जीवन्नपि मृतोपमः ॥

वृद्धचाणक्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरण-विमर्शः

[निबन्धकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(३)

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥

इति सप्तशतीश्लोके (४।१५) भवतीप्रसादात् इति पदस्यार्षत्वं प्रायेण प्रतिजानते व्याख्यातारः। अस्माकं पुनरत्र गरीयान् संशयो वर्तते। तथाहि भवच्छब्दस्य सर्वनामसंज्ञाविधाने प्रयोजनानि प्रतिपादयता वार्त्तिककृतोक्तम्—भवतोऽकच्छेषात्वानि (१।१।२७।११) इति। व्याख्यातञ्चेदं भाष्यकृता—भवतोऽकच्छेषात्वानि प्रयोजनम्। अकच्—भवकान्। शेषः—स च भवांश्च भवन्तौ। आत्वम्—भवादृक्। इति। निरुक्तप्रयोजनतोऽतिरिक्तान्यपि प्रयोजनानि वर्तन्त इति प्रदर्शयता भगवता पतञ्जलिनोक्तम्—"किं पुनरिदं परिगणनम्, आहोस्विदुदाहरणमात्रम्। उदाहरणमात्रमित्याह। तृतीयादयोऽपि हीष्यन्ते। सर्वनाम्नस्तृतीया च [२।३।२]। भवता हेतुना। भवतो हेतोरिति।" इति। कौस्तुभकृता पुनरितोऽप्यतिरिक्तप्रयोजनप्रतिपादिका काचन कारिका समुद्धृता—

फिञद्रिमयटः पूर्वनिपातष्ठक्छसौ तथा।
आत्वैकशेषष्यञ्विरहा अकच्च भवतः फलम्॥ इति।

अत्र प्रथमत इदमेव प्रतीतिपदवीमवतरति यत् न खलु वाक्यकारेण नापि पदकारेण नापि प्राचीनकारिकाकारेण भवच्छब्दस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वनामस्वन्तर्भावे प्रयोजनप्रदर्शनावसरे पुंवद्भावस्य समुल्लेखो विहित इति। तसिलादिष्वा कृत्वसुचः [६।३।३५] इति सूत्रेऽव्याप्तिप्रदर्शनपरेण कात्यायनेनोक्तम्—"ठक्छसोश्च" इति। वार्त्तिकमिदं व्याचक्षाणेन भाष्यकृता "ठक्छसोश्च पुंवद्भावो वक्तव्यः। भवत्याश्छात्राः भावत्का भवदीयाः।" इत्येवोक्तम्। प्रायेण भाष्यकारेण वार्त्तिकानामवक्तव्यत्वमेव प्रतिपाद्यते, अत्र पुनर्जाज्वल्यमानेऽपि 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति वचनब्रह्मास्त्रे भाष्यकारेण वैतसी वृत्तिरेव समाश्रिता। ठक्छसोश्चेत्यस्य भवच्छब्दैकविषयतया वृत्तौ ठक्छसोरेव परयोर्भवच्छब्दस्य पुंवद्भावो नान्यत्रेति नियमो विस्पष्टमेव प्रतीयते। "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति भाष्यकारवचनन्तु भवच्छब्दातिरिक्तसर्वनामशब्दपरमित्यर्थात् सिध्यति। "एक तद्धिते च" (६।३।६२) इति सूत्रेण तद्धित उत्तरपदे च एकशब्दस्य पुंवद्भावविधानं सर्वथा सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वचनस्य सूत्रकारासम्मतत्वमवबोधयति। एवञ्च सूत्रवार्त्तिककारमतेन सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वचनस्य शशविषाणायमानत्वम्, सूत्रकारमतेन केवलम् एकशब्दस्य तद्धित उत्तरपदे च पुंवद्भावः, वार्त्तिककारमतेन ठकि छसि च केवलं भवच्छब्दस्य पुंवद्भावः, भाष्यकारमतेन भवच्छब्दव्यतिरिक्तसर्वनाम्नो वृत्तिमात्रे पुंवद्भावः, भवच्छब्दस्य पुनष्ठकि छसि च इति सिद्धम्। एवञ्च—

स्वर्गं प्रयाति च ततो भवतीप्रसादात् [सप्तशत्याम् ४।१५]

आयास्ये भवतीगेहमिति तां प्रहसन् हरिः [विष्णुपुराणे ५।२०।३२]

यस्मिन्नरे महेशानि तुष्टा भार्या पतिव्रता।
सर्वो धर्मः कृतस्तेन भवतीप्रिय एव सः॥

[महानिर्वाणतन्त्रे ८।४४]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमत्रभवतीप्रत्ययादस्मान् संयुतदोषाक्षरैः क्षिणुथ [शाकुन्तले ५]।

कलाभिस्तृप्त्यर्थं सुरपितृनृणां पञ्चदशभिः
सुधासूतिर्देवः प्रतिदिनमुदेतीत्यसदिदम्।
परिभ्राम्यत्येष प्रतिफलनमासाद्य भवती-
कपोलान्तर्युक्त्या त्वदधरसुधासंग्रहपरः॥

अलङ्कारसर्वस्वविमर्शिन्याम् अपह्नुतिप्रकरणे।

एकोऽहं भवतीसुतक्षयकरो मातः कियन्तोऽरयः

[वेणीसंहारे ५।१९]

न्याय्यास्ते भवतीदासा इति तां चावदन्नृपः [कथासरित्सागरे २।१३।१९२]

इत्यादयः प्रयोगा निराबाधा एव।

यच्च दुर्घटवृत्तौ स्त्रियाः पुंवदित्यत्र योगविभागमाश्रित्य समाहितम् तदप्यनावश्यकमेव।

यच्च निरुक्तवेणीसंहारचरणव्याख्यानावसरे अप्पाशास्त्रिविद्यावाचस्पतिनोक्तम्—"अत्र भवदात्मजक्षयकर इति चेत् सम्यगभविष्यत् पाठः। भवतो हि सर्वनाम्नः 'एवं तर्हि सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः' इति भाष्यकारोक्त्या पुंवद्भावे भवत्सुतक्षयकर इत्येव स्याद्रूपम्, न पुनर्भवतीसुतक्षयकर इति। न च फिन्नद्रीति परिगणनया पुंवद्भावे न सर्वनामत्वमिति वाच्यम्। पुंवद्भावोऽपि भवतः सर्वनामत्वे प्रयोजनम् इति समभिधाय भवत्याः पुत्रः भवत्पुत्र इति कौस्तुभ उक्तत्वात्। फिन्नद्रीत्यादेरुदाहरणमात्रत्वस्य भाष्यादावुक्तेश्चेति। यत्तु जगद्धरो 'भवतीत्यत्र पुंवद्भावाभावः प्रियादिपाठात्, स्त्रियाः पुंवदिति योगविभागाद्वे'ति प्राह तदेतन्न समञ्जसम्, प्रियादिषु सुतशब्दस्य पाठाभावाद्, योगविभागस्य चादर्शनात्" इति तदप्येतेन प्रत्युक्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहृदयशिरोरत्नेन वैयाकरणशिखामणिना व्यक्तिविवेककृतापि वचनप्रक्रमभेदप्रकरणे प्रतिपादितम्—

यथा च 'अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन' [नागानन्दे १।१४] इति, अत्र ह्येकवचनेन भगवतीमेकां सम्बोध्य प्रसादसम्बन्धितया यस्तस्य बहुत्वनिर्देशः स वचनप्रक्रमभेदो दोषः। तेनात्र "भवतीप्रसादेन" इति युक्तः पाठः। इति।

अत्र विस्पष्टमेव "भवतीप्रसादेन" इत्युक्तम्, न पुनर्भवत्-प्रसादेनेति। व्याख्याकृता रुचकेनापि तूष्णीमेतस्य समर्थनं विहितम।

अर्वाचीनैस्तु वैयाकरणैश्चन्द्रादिभिः सर्वैरेव "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति सर्वत्रैव समास्थितम्॥ तेषां मतेन—

जन्मप्रभृति पापिष्ठाथावां देवि दृढव्रते।
त्वत्प्रसङ्गाद्भवद्गेहे धर्मलेशोऽस्ति नाविह॥ पद्मपुराणे १।२०।३०

भवद्दर्शनात् प्रभृति [कादम्बर्याम् १३७]
एतन्मनो यद्भवदेकवृत्ति [नैषधे ३।१०५]
तन्मयापि भवदर्हणार्हति [नै० १८।४५]

भामिनि रुचिरमूर्त्तिः सुराजगुणसम्पूर्तिरसावर्भको भवदन्वय-सम्भवो न भवति।...निमित्तेन केन भवदधीनो जातः।
[दशकुमारे १।१]

अनेन रम्भोरु भवन्मुखेन तुषारभानोस्तुलया धृतस्य।
ऊनस्य नूनं परिपूरणाय ताराः स्फुरन्ति प्रतिमानखण्डाः॥
अनर्घराघवे ०।८१

[अत्र 'तवाननेन' इति पाठान्तरमप्युपलभ्यते।]

मदात्मजमेनं भवत्तनुजस्य...परिचर्याकरणायानीतवत्यस्मि।
[दशकुमारे १।१]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यसंक्रान्तप्रेमाणो नागरका अधिकं दक्षिणा भवन्ति ।

[विक्रमोर्वशीये]

न मानिनीशं सहतेऽन्यसङ्गमम् [भट्टौ २।६]

सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ लप्स्यसे ।

अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा ॥ [काव्यादर्शे २।१२६]

इत्यादयः प्रयोगा उपपद्यन्ते ।

(स्थलविशेषेषु विपरीता अपि प्रयोगा दृश्यन्ते । यथा

ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता [दशरूपके २ ।२५]

अन्यासम्भोगचिह्नैः [प्रतापरुद्रयशोभूषणे] इत्यादिषु ।)

अत एव ठक्छसोश्चेति वार्त्तिकं व्याचक्षाणैर्बहुभिरुक्तम्—सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वचनस्य जागरूकत्वादेतद्वार्त्तिकम् एक तद्धिते च इति सूत्रं च नारम्भणीयमेवेति।

एवञ्च सूत्रकृता एक तद्धिते च इति सूत्रस्य प्रणयनात् वार्त्तिककृता च ठक्छसोश्च इति वार्त्तिकस्य विरचनात् भाष्यकृता च तस्यैव वार्त्तिकस्याप्रत्याख्यानात् भवच्छब्दस्य सर्वनामस्वान्तर्भावे प्रयोजनपरिगणनावसरे वार्त्तिक-भाष्य-प्राचीनकारिकासु पुंवद्भावस्य चानुल्लेखात् भवतीप्रसादादित्यादीनां सर्वथा साधुत्वमेवावस्थितम्, न पुनः संक्षिप्तसारादिसम्मतमागमिकत्वम् इति शम् । (क्रमशः)

स्तुतिमुग्धस्य मूर्खता

[श्रीउपेन्द्रमोहन-सांख्यतीर्थः]

बलिभुक् कश्चिदाहृत्य कुतश्चिन्मांसखण्डकम् ।
वृक्षशाखां समाश्रित्य भोक्तुं तदुपचक्रमे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृगालः कश्चिदेतर्हि तमेव देशमीयिवान् ।
विलक्ष्य काकं तन्मांसं बुभुक्षुः प्राह सादरम् ॥
दिष्ट्या भ्रातः कृतस्त्वं भो धात्रा समुदितो गुणैः ।
मसीत्विषा ते वपुषा लज्जते नवनीरदः ॥
यथा चक्षुस्तथा वक्षः पक्षावपि च ते तथा ।
सर्वाङ्गसुन्दरः पक्षी नेक्षितस्त्वादृशो मया ॥
एवमप्ययमेकस्ते दोषो दुःखाकरोति माम् ।
असम्यग्दर्शिना यत्त्वं धात्रा मूकः कृतः सखे ॥
अयथावद् गृहीतार्थं वचो धूर्त्तस्य धारयन् ।
भिन्नधीः कुमतिः काको मनस्येवं चकार सः ॥
अमुं मम मनोज्ञेन वपुषैव विमोहितम् ।
करिष्ये नितरां प्रीतं वचसाऽमृतवर्षिणा ॥
इति व्यवसितस्तुष्टो बलिपुष्ट-गणाग्रणीः ।
उच्चैः स्वजातिसुलभं ससर्जाचिरतः स्वरम् ॥
'का'-शब्दं कुर्वतस्तस्य विवृतान्मुखगह्वरात् ।
चस्कन्दाशु मांसखण्डं तच्छृगालोऽग्रहीन्मुदा ॥
अतिस्तुतो य आत्मानं गर्वितो बहु मन्यते ।
तस्य नश्येद्धतस्यास्य काकस्येव समीहितम् ॥

[आशाधरभट्टस्य पूर्वपक्षावलीतः]

व्याख्यानशैली

कथं

"शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्थुः फणरत्नशोभाः ॥"

इति ? अत्र शरीरमेव शरीरमात्रम् इति मात्र-प्रत्ययेन शरीरादन्यत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि न विकृतम्, "मात्रं कार्त्स्न्येऽवधारणे" इत्यभिधानात्। फणरत्नशोभास्तथैव तस्थुरित्यत्र शोभापदं व्यर्थम्, फणरत्नानां विकृतत्वापत्तेः। फणरत्नानि तथैव तस्थुः—एवं वक्तव्यम्। यदा रत्नानि स्थितानि तदा शोभा अपि स्थिता एव, तस्माच्छोभापदं न घटत इत्यर्थः इति प्रश्नः।

अत्र समाधीयते—

सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषण-मुपसंक्रामतः। अत्र तु रत्नानां शोभा रत्नशोभा इत्यत्र "भेद्यं विशेष्यमित्याहुर्भेदकं तु विशेषणमि"ति।

भेद्यभेदकयोः श्लिष्टिः सम्बन्धोऽन्योन्यमिष्यते।
श्लिष्टे यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्॥

यथा राजपुरुष इत्यत्र राजा इति विशेषणं भवति पुरुष इति पदं विशेष्यं भवति। तद्वदत्रापि रत्न इति पदं विशेषणं भवति, शोभा इति पदं विशेष्यं भवति। विशेष्ये तु यदा बाधः समायातस्तदा विशेषणमुपसंक्रामति, तदा यद् विशेषणं तद्विशेष्यं भवति, यद्विशेष्यं तद्विशेषणं भवति इति। तदार्थः कियान् सम्पन्नः? शोभापदं रत्नपदस्य विशेषणम्, तदा शोभाविशिष्टानि रत्नानि तथैव तस्थुरित्यर्थः।

बुद्धिमान् बालकः

बालकः। अम्ब! अपि प्रत्यासीदति मे जन्मतिथिः?
माता। अथ किम्। कथमेवं पृच्छसि वत्स?
बालकः। तर्हि काल इदानीं सौशील्येन वर्तितुम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[जन्मतिथौ प्रायेण पुत्रादयः पित्रादिभ्य उपायनानि लभन्ते। ये तावद् दुर्ललितास्ते स्वल्पमूल्यान्युपायनान्यधिगच्छन्ति, सुशीलाश्च महार्घ्याणि ।]

कति वा भाषा न शिक्षिताः ?

अचिराढ्यस्य (nouveau riche) पत्नी। (प्रतिवेशिनीं प्रति) दृश्यतां भद्रे ! तनयेन मे तुषारेण कति वा भाषा न समधिगताः। देवभाषा, वङ्गभाषा, आङ्ग्लभाषा, इतिहासः, भूगोलम्, बीजगणितम् इति। तुषार, उच्यतामेषा बीजगणितेन, अपि कुशलं भवत्या इति।

अहो प्रज्ञा

सेनापतिः सेनानिवासं परिपश्यति स्म। गृहमेकं प्रविश्य सोऽपश्यत्, एकः सैन्यः पत्रमेकं वाचयति, अपरश्च तस्य कर्णौ दृढतरमपिदधानस्तदेकतानमनाः शृणोति। तद्दृष्ट्वा विस्मयाकुलः सेनापतिरपृच्छत्, युवामत्र किं कुरुथ इति।

"आर्य ! अद्य चैत्रस्य पत्न्याः सकाशात् पत्रमेकमागतम्। स वाचयितुं न शक्नोतीति कृत्वाहं तस्मै वाचयामि तत् पत्रम्।"

"चैत्र ! त्वं पुनः किं करोषि ?"

"आर्य ! अहं तावदुभाभ्यां पाणिभ्यां मैत्रस्य कर्णौ पिदधामि। स मम पत्न्याः पत्राणि पठति चेत्, पठतु नाम। नास्ति मे तत्र कापि विप्रतिपत्तिः, परं तया यद्विलिखितं तस्यैकोऽपि शब्दस्तेन कथमपि न श्रोतव्यः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मितव्ययी हीरालालः

वैद्युतशकटेन गच्छन् हीरालालो धूमवर्तिकामेकां निष्कास्य पार्श्वस्थितमारोहिणं पप्रच्छ, "अस्ति भवतः सकाशे दीपशलाके"ति?

"विषीदामि तावन्निवेदयन् मत्सविधे नास्तीति।"

ततश्च स द्वितीयमारोहिणं पृष्टवान्—"अस्ति वा भवतः सकाशे ?" इति।

"ममापि नास्ति" इति तेनोक्तम्।

ततश्च हीरालालेनोक्तम्—"हा हन्त! दुर्भाग्यस्य विलसितम्। अगत्या स्वीयैव दीपशलाका मयोपयोक्तव्या" इति।

सावधानो न नश्यति

दन्तशूलेन भृशं पीड्यमानः कश्चन शकटनन्द(Scotland)-वास्तव्यस्तरुणो दन्तानामुद्धरणाय कञ्चन दशनचिकित्सकं शरणमियाय। यावदसौ दान्तिको रोगिणो ज्ञानापहरणाय बाष्पयन्त्रं सज्जीकृतवान्, तावत् स तरुणः कञ्चुककोषात् सर्वमर्थं निष्काशितवान्। इदानीमेवायं मम पारिश्रमिकं दातुमुद्युक्त इति मत्वा दशनवैद्योऽवदत्,—हन्त हन्त, अलमिदानीमेतेन। परस्तान्मे पारिश्रमिकं दद्याः इति। तेन चातिनिपुणेन शकटनन्दीयेनोक्तम्—तत्तु सम्यक्, परं संज्ञासंहरणात् पूर्वमेव द्रविणस्य गणनं क्रियते चेत्, हानेराशङ्का न स्यात् इति।

कृतज्ञतायाः प्रकारः

कस्याश्चिद् भद्रमहिलायाः परिचारिका पीडया समाक्रान्ता। सा च भद्रमहिला न केवलं तस्याश्चिकित्सायाः व्ययं निर्वाहित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षती, परं स्वयमेव रात्रिन्दिवं तस्याः परिचर्यां व्यदधात्। दासी पुनरुल्लाघतामापन्नैव तस्याः कार्यं परित्यक्तुमैच्छत्। 'किमिति स्वयं मयैवं शुश्रूषितापि मां परित्यक्तुमुद्युक्तासि' इति पृष्टा किङ्करी प्रत्यवदत्, मया तु भद्रजनानामेव गृहे कार्यं कर्तुमिष्यते। यदा तावन्मयात्रागतम्, तदा मम प्रतीतिरासीद् यद् भवती भद्रमहिलैव। इदानीं भवत्या आचरणेन तस्याः प्रतीतेर्मूले कुठारोऽर्पितः। इदानीमवगतं मया न खलु त्वं परमार्थतो भद्रमहिलासि, का वा भद्रमहिला स्वाभिमानाय जलाञ्जलिं दत्त्वा स्वयमेव दासीं परिचरेत्। तव गृहेऽवस्थानेन मम लाघवं स्यात्, इत ऊर्ध्वमभिजाता मां नैव नियोक्ष्यन्ते, स्वार्थस्तु मया सर्वथा समीक्षणीयः, अतो भवत्या गृहेऽवस्थातुं तु न शक्यते। इति।

रसमञ्जरी

समीचीनानि निर्वचनानि

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

देवदत्तः (आपणे श्मश्रुलं माहम्मदं निर्वर्ण्य)। मित्र, चिराद् दृष्टोऽसि। किमिति नितरां दुर्बल इव विलोक्यसे? कच्चित् कुशली त्वम्?

कुतबुद्दीनः। कुतो वा कुशलमधन्यानाम्?

देवदत्तः। किमिति प्रहेलिकामवलम्बसे। विस्पष्टमेवोच्यतां किं ते वृत्तमिति।

कुतबुद्दीनः। किं वा स्यात्? न किमपि संवृत्तम्!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवदत्तः। भृशं जार्णोऽसि। चक्षुषोरधस्तात् कालिमा, नयनयुगलं निष्प्रभम्, मुखं च परिम्लानम्, तरुणोऽपि त्वं स्थविरायसे। किमत्र बीजम्?

कुतबुद्दीनः। चिरं खलु मया शब्दशास्त्रमधीतम्, तृणाय मत्वा शरीरसौष्ठवम् अजरामरवद् विद्या समाराधिता, सर्वं शास्त्ररहस्यमुद्भिन्नम्, शब्दजातं करामलकवत् प्रत्यक्षीकृतम्, केवलं "मिया" "मालिक" "मोल्ला" इति शब्दत्रितयस्य निर्वचनं कथमपि न शक्यते कर्तुम्। एतदर्थं द्रविणव्ययो न गण्यते, सर्वविधः क्लेशः स्वीक्रियत एव, तथापि सोऽन्धकारस्तदवस्थ एव। चिन्ताभार-प्रपीडितस्य मे निशायामपि निद्रा नायाति नेत्रे, चिन्ताजागरणाभ्यां च शरीरमप्यनुदिनं कृशिमानमापद्यते। परं किं करोमि, क्व यामि! नास्ति तथाविधो मौलवी यो नाराधितो मया, नास्ति तथाविधः पीरो यो न शरणीकृतो मया। अहर्निशं गच्छंस्तिष्ठन् पश्यञ्छृण्वन् "मिया" "मालिक" "मोल्ला" इति त्रितयं स्मरामि, इति त्रितयं जपामि, इति त्रितयं ध्यायामि।

देवदत्तः। हन्त हन्त त्वं परमाणुमेव पर्वतं कृतवानसि, वल्मीकमेव हिमाद्रिं विहितवानसि। किमिति पूर्वमेव मह्यं न कथितम्? किं न विज्ञायते भवताऽऽस्माकमुणादिशास्त्रं यद्बलेनाखिलस्य शब्दजातस्य विनैवायासं निर्वचनं सिध्यति, यत्प्रसादेन पुंसश्च स्त्रियाश्च श्वशुरस्य च श्वश्र्वाश्च व्युत्पत्तिः पुरत एव परिस्फुरति। श्वः प्रातरागच्छतु भवान् मत्सविधम्, अहं त उणादिसूत्राणि व्याख्यास्यामि, अचिराच्च ते मिया-मालिक-मोल्लानां प्रकृतिप्रत्ययादिकं प्रमुख एव भासेत।

कुतबुद्दीनः। कृपया भवतैवमुक्तम्, मनस्तु मे संशयमेव गाहते। यत् खलु मयारबाणां सकाशान्नावगतम्, शर्मण्याच्छ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रणीकृत्य न विज्ञातम्, उणादिसूत्र-साहायकेन तस्योपपत्तिर्भविष्यतीत्यत्र कः प्रत्ययः ?

देवदत्तः। फलमेव प्रत्ययमाधास्यति। अवश्यमेव श्वः प्रातरागन्तव्यम्।

(परेद्यवि प्रातर्देवदत्तस्य गृहमागत्य पञ्चषोणादि-सूत्र-पठनानन्तरम्)

कुतबुद्दीनः। तिष्ठ तिष्ठ, ज्ञातं मयेदानीम्। अहो! अद्य मे सफलं जन्म तपश्च सफलं मम—

औणादिसे साधके लिया मिया मालिक मोल्ला।
माधातुसे प्रत्यय किया डिया डालिक डोल्ला॥
उणादितः साधिता हि मिया मालिक मोल्ला।
माधातुतः प्रत्यया हि डिया डालिक डोल्ला॥ इति।

व्याघ्राचार्य्यो बृहल्लाङ्गूलः।

[वङ्किमचन्द्र-चट्टोपाध्यायः]

[सुगृहीतनामा वङ्किमचन्द्रचट्टोपाध्यायः कलिकातायाः समीपवर्तिन्याश्चतुर्विंशतिपरगणान्तःपातिकण्टकितरुपल्ल्यां (कांटालपाड़ा ग्रामे) १७६१ शाके सौराषाढ़स्य त्रयोदशदिवसे मर्त्यलोकमवतीर्णः, १८१६ शाके सौरचैत्रस्य च षड्विंशे दिवसे दिवमारूढ़ः। आङ्लभाषायां वङ्गभाषायां च मनीषिणोऽस्यानितरसाधारणं प्रावीण्यमासीत्, परःशतास्तानेन प्रवन्धाः प्रणीताः, पाश्चात्त्यदेशेषु प्रचलिताः novel, romance प्रभृत्याख्यानप्रकारा अनेनैव प्रथमतो वङ्गभाषायां प्रचारिताः।]

आसीत् पुरा सुन्दरवनाभ्यन्तरे व्याघ्राणां महती सभा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गहनकाननान्तरे प्रशस्तायां स्थल्यां भीषणाकृतयो भूयांसः शार्दूला लाङ्गूलेषु कृतभराः दंष्ट्रामयूखैररण्यभूमिं समुज्ज्वलतामापादयन्तः श्रेणिशः समुपविष्टाः। सर्वे चैकमत्येनामितोदरं नामातिप्राचीनं शार्दूलं साभापत्ये विनिवेशितवन्तः। अमितोदरमहोदयोऽपि लाङ्गूलासनं परिगृह्य सभाकार्यं प्रवर्तयामास। स हि सभ्यान् सम्बोध्याभाषत—

अहो! सुदिनमद्यास्माकम्! अद्य तावत् सर्वे वयमरण्यनिवासिनो मांसाभिलाषिणो व्याघ्रकुलतिलकाः परस्परमङ्गलसाधनार्थम् अत्र वनाभ्यन्तरे समवेताः। अहो! कुत्साकारिणः पिशुनात्मानोऽन्ये पशवः प्रचारयन्ति, नितरामसामाजिका एव वयम्, एकस्मिन्नेवारण्ये एककवास एवास्मभ्यं रोचते, न खलु लेशतोऽप्यैक्यं वर्ततेऽस्मास्विति, परम् अद्य वयं सर्वे सुसभ्या व्याघ्रनिवहाः समवेता निर्मूलस्यास्य निन्दावादस्य निरसनाय सम्प्रवृत्ताः। साम्प्रतं यथा प्रतिदिनमेव समुज्जृम्भते सभ्यताश्रीः, तथा सर्वथाशास्महे यदचिरादेव व्याघ्राः सभ्यजातीनां धुरीणत्वमापत्स्यन्त इति। इदानीं प्रार्थयेऽहं विधातारं यद् भवन्तोऽनुदिनमीदृशीमेव स्वजातिहितैषितां प्रकटयन्तः परमसुखेन नानाविधान् पशून् विनाशयन्तस्तिष्ठन्त्विति। (सभामध्ये लाङ्गूलानां चटचटारवः)।

इदानीं भो भ्रातरः यदुद्दिश्य वयमत्र समवेतास्तद्विवृणोमि। विदितमेवैतत् सर्वेषामेव भवतां यदत्रत्यसुन्दरवनव्याघ्रसमाजे विद्यानुशीलनं क्रमेणैव विलोपमासादयतीति। दृढतरेण चाभिलाषेण कृतमस्माकं हृदयेषु पदं यद् वयं विद्वांसः स्याम इति। अद्यत्वे हि सर्व एव विद्वांसो भवन्ति, वयमपि भविष्यामः। विद्यानुशीलनार्थमेव व्याघ्रसमाजोऽयं संस्थापितः। साम्प्रतमनुमोदनमेतस्य क्रियतां भवद्भिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाप्तिमधिगते सभापतेरस्मिन् भाषणे, समवेताः सभ्याः हाउमाउरवेण प्रस्तावमिममनुमोदितवन्तः। ततश्च यथारीति केचन प्रस्तावा वाचिता अनुमोदिताश्च सन्तः सभ्यनिवहेन परिगृहीताः। प्रस्तावस्यानुषङ्गेण च महान्ति भाषणान्यभवन्, कामं तानि व्याकरणानुगतान्यलङ्कारैश्चाऽङ्कृतानि, तथापि तेषु शब्दविन्यासशैली सुभाषणासीत्। भाषण-प्रभावेण च प्रकम्पितं सुन्दरवनम्।

अनन्तरं समाप्तेष्वितरेषु सभाकार्येषु सभापतिनोक्तम्, विदितमेव भवतां यदस्मिन् सुन्दरवने बृहल्लाङ्गूलाभिधानः कश्चन सुविद्वान् व्याघ्रः प्रतिवसतीति। अद्य रात्रावस्माकम् प्रार्थनयासौ मनुष्यचरित्रमधिकृत्य प्रबन्धमेकं वाचयितुमङ्गीकृतवान्।

मनुष्यनामश्रवणेनैव केषाञ्चिन्नवीनानां सभ्यानां बुभुक्षोद्रेकः समजनि, परं ते तदानीं पाब्लिकडिनारसमाख्यायाः सग्धेः सूचनामनुपलभ्य तूष्णीमेवावतस्थिरे।

व्याघ्राचार्यबृहल्लाङ्गूलमहोदयः सभापतिना समाहूतो गर्जनपुरःसरं गात्रोत्थापनमकरोत्। ततश्च पथिकानां भीतिविधायकेन कण्ठेनाधोलिखितं प्रबन्धं वाचयामास—

"सभापतिमहोदय, व्याघ्रो भद्रा व्याघ्राश्च, मनुष्या नाम द्विपदप्राणिविशेषः। तेषां पक्षो नास्तीति ते पक्षिव्यपदेशं नार्हन्ति, परं चतुष्पदैस्तेषां सादृश्यं समुल्लसति। यानि यान्यङ्गानि यानि यान्यस्थीनि च चतुष्पदानां तथाविधानि सर्वाणि मनुष्येषु वर्तन्ते। विशेषस्त्वयमेव यच्चतुष्पदानां यत् संस्थानसौष्ठवं तन्मनुष्येषु नोपलभ्यते। केवलस्येदृशस्य विशेषस्य कृते न खल्वस्माभिर्द्विपदा इति जुगुप्सनीयाः पुरुषाः।

"जानन्त्येव भवन्तो यन्मनुजपशुरतीव सुस्वादुः सुभक्ष्यश्च। (श्रुत्वा सभ्याः सर्वे रसनया मुखलेहनं कृतवन्तः।) ते हि प्रायेणा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नायासमेव मृत्युमधिगच्छन्ति। न खलु ते मृगादय इव द्रुतं पलायितुमलम्, न वा महिषादय इव बलवन्तो वा शृङ्गाद्यायुधोपेता वा। जगदीश्वरेण जगत्प्रपञ्चमिमं व्याघ्रजातेः सुखायैव विनिर्मितमित्यत्र नास्ति संशयः। एतदर्थमेव व्याघ्राणां परमप्रीतिकरं भोज्यं मनुजम् आत्मरक्षणसामर्थ्येनापि न योजितवान् धाता; वस्तुतो मनुष्यजातेररक्षितामवस्थाम्—नखदशनविषाणादिशून्यत्वम्, गमन-मान्थर्यम्, कोमलप्रकृतित्वं च—पर्यालोच्य कथं विधात्रा विनिर्मिता इमे इति विस्मय एव समुदेति मानसे। न खलु व्याघ्रजातेः परिचरणमन्तरेणैतेषां जीवितस्य प्रयोजनान्तरमुपलभ्यते।

"एतेन कारणकलापेन विशेषतश्च तेषां मांसस्य कोमलतया नितरां प्रिया एव मनुष्या अस्माकम्, तथाहि मनुजदर्शमेव वयं भक्षयामः। एतत्तु नितरां विस्मयास्पदं यत् तेऽपि सुतरां शार्दूलभक्ताः। यदि यूयमत्र प्रतीयात तर्हि यन्मम समापतितं तद् विवृणोमि। विदितमेवैतद् भवतां सुचिरं देशाद्देशान्तरं परिभ्रम्य बहुदर्श्यस्मि संवृत्त इति। यस्मिंस्तावद्देशे मया प्रोषितं स खल्वस्यैव व्याघ्रभूमेः सुन्दरवनस्योत्तरतो वर्तते। तत्र च गोमनुष्यादयो निकृष्टाशया अहिंस्रा एव पशवो निवसन्ति। तत्रत्या मनुजा द्विविधाः। तेषामेका जातिः कृष्णवर्णा, अपरा च श्वेतवर्णा। कदाचिन्मया विषयकर्मोपलक्ष्येण तत्र गतम्।" इति।

एतच्छ्रुत्वा महादंष्ट्रो नामैकः समुद्धतस्वभावः शार्दूलः पृष्टवान्, किं तद्विषयकर्मेति।

बृहल्लाङ्गूलमहोदयेनोक्तम्, विषयकर्म नाम आहारान्वेषणम्। साम्प्रतं सभ्यजनैराहारान्वेषणं विषयकर्मेति व्यपदिश्यते। वस्तुतः सर्वेषामेवाहारान्वेषणं विषयकर्मेति व्यपदिश्यते इति न। अभिजातानामाहारान्वेषणं विषयकर्मेत्याख्यायते, अनभिजातानामाहारान्वेषणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतारणम् उञ्छवृत्ति भिक्षा चेत्यभिधीयते, धूर्तस्याहारान्वेषणं चौर्य-मिति कथ्यते, बलवतामाहारान्वेषणं दस्युतेति कीर्त्यते। पुरुष-विशेषे च दस्युताशब्दो नोपयुज्यते, तस्य स्थाने वीरत्वमित्येव कथनमावश्यकीभवति। यस्य तावद् दस्योर्दण्डप्रणेता वर्तते, तस्यैव कर्म दस्युतेति समाख्यायते, यस्य दस्योर्दण्डप्रणेता नास्ति, तस्य दस्युता वीरत्वमिति संकीर्त्यते। यदा तावद् भवन्तः सभ्यसमाजमधितिष्ठेयुस्तदा नामवैचित्र्यमिदमवश्यमेव स्मरण-सरणिमारोपणीयम्, अन्यथा जनैरसभ्या इति निर्दिश्येयुः। वस्तुतः, यथाहं पश्यामि, तथा वैचित्र्यप्रपञ्च एष सर्वथाप्यनावश्यक एव। उदरपूजेत्येकैव समाख्या वीरत्वादिकं सर्वमेवावबोधयेत्। (क्रमशः)

पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सहृदयाः, केन वा न प्रत्यक्षीकृतं निखिलजगन्नयनानन्दकरे समुज्ज्वलशिखासम्भारभासुरे भगवति चन्द्रमसि मालिन्यं, न वा प्रतीतं "प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः" इति कविवचनस्यावैतथ्यम्। किं तावदिदं मालिन्यमिति विचारय-न्तस्तु बहवो बहुधा विप्रतिपद्यन्ते। तथाहि वङ्गीया वृद्धा निशायां नप्तृभ्य उपकथा वर्णयन्ती जरत्याकाशयोषित् सुखं समुपविष्टा चक्रेण तूलतः सूत्रं विनिर्मातीत्यभिप्रैति। पाश्चात्याः पुनः केनचन वृद्धेन रविवासरे शास्त्रशासनं समुल्लङ्घ्य समिदर्थं वृक्षस्य शाखा भग्नेति देवदूतेनासावभिशप्ता, यथा तावत् पृथिव्यां त्वया रविवासरो न सम्भावितः, तथा स्वर्गे त्वमाकल्पान्तं चन्द्रदिनमेव परिपालयि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यसीति, स एव कृष्णकायः स्थविरः कलङ्करूपेणास्माकं नयनयोरतिथीभवतीत्याशेरते। गुरुपत्नीहरणाद् वा, भार्यान्तरतिरस्कारेण भार्याविशेषेऽव्यतिप्रसक्तेर्वा चन्द्रः कलङ्केन लिप्तो राजयक्ष्मणा च समाक्रान्त इति पौराणिकाः कथयन्ति। समुद्रमन्थनकाले सागराभ्यन्तरात् समुत्तिष्ठंश्चन्द्रमास्तत्रत्येन पङ्केन लिप्तः समुदतिष्ठदिति केचन कविप्रवराः सम्मन्यन्ते। अपरे पुनः शरणागतः शशको वा सारङ्गो वा "क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव" इति न्यायेन स्वक्रोडमधिष्ठापितः कलङ्काकारेण स्फुरतीति सम्मन्यन्ते। भूमेरेव छाया चन्द्रमसि निपतिता कलङ्कत्वेन सम्भाव्यते निर्विविकैर्जगज्जनैरिति कालिदासादयः कविप्रवराः प्रतिजानते। इतरे पुनर्विभावर्य्या निपीतमन्धतमसं कलङ्करूपेण जागर्तीति संगिरन्ते। तथाच कुवलयानन्दगतोऽपह्नुतिप्रकरणस्थः श्लोकः—

> अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
> सारङ्गं कतिचिच्च सञ्जगदिरे भूच्छायमैच्छन् परे।
> इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
> तत् सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे॥

इति। कुवलयानन्दस्य कुवलयानन्दकारिकायाश्च यावन्ति पुस्तकान्यस्माभिर्दृष्टानि सर्वत्रैव 'सञ्जगदिरे' इति पाठः समस्ति। चन्द्रकान्ततर्कालङ्कारविरचितेऽलङ्कारसूत्रेऽपि स एव पाठः समादृतः। स पुनर्व्यक्तमेव प्रामादिकः, गदतेः परस्मैपदित्वस्य सर्वेषामेव सम्मतत्वात्, उपसर्गवशेन वार्थविशेषेण वास्यात्मनेपदित्वस्यास्मरणात्, कर्मव्यतिहारेऽप्यस्य तङः प्रतिषिद्धत्वात्। व्याख्यात्रा वैद्यनाथेनात्र तूष्णीम्भावावलम्बनात् तेन स्वीकृतः पाठश्च्युतसंस्कृतिदोषरहित एवासीदिति प्रतीयते। स च पाठो रसार्णवसुधा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करे समुपलभ्यते। तत्र हि 'सञ्जगरिरे' इति पठ्यते। गिरतेः परस्मैपदित्वेऽपि ["अवाद् ग्रः"] "समः प्रतिज्ञाने" [१।३।४२] इति सम्पूर्वकात् तस्मात् प्रतिज्ञानार्थ आत्मनेपदविधानात्, अत्र च तदर्थस्य जागरूकत्वादात्मनेपदं सूपपादमिति शम्।

गेटे-कवि-सुभाषितानि

(Golden thoughts from Goethe)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

ये तावत् सुविरलाः कविप्रकाण्डाः प्रतिपलमेवाभिनवप्रतिभाविलासेन नवनवां सृष्टिं विदधानाः कविप्रजापतिपदमधिरूढाः, तेष्वेवायमन्यतमो जोहान् भोल् फगाङ् फन् गेटे (Johann Wolfgang von Goethe) नाम। शार्मण्यदेशसमुद्भवोऽयं कविचूडामणिः कथा आख्यानान्याख्यायिका नाटकानि च विरचयन्, चित्रकलायामप्यनितरसाधारणं प्रावीण्यं प्रदर्शयन्, शारीरतत्त्वे वृक्षायुर्वेदे विज्ञानशास्त्रे च नवीनानि तथ्यानि विवृण्वन् कस्य न चमच्चकार चेतस्तदानीन्तनस्य सहृदयस्य। वर्षाणां शतद्वयात् पूर्वमसौ महाकविः शार्मण्यदेशे फ्राङ्क्फोर्टनगरे अगष्टमासस्याष्टाविंशतितमे दिवसे (28th August, 1749) स्वजन्मना मण्डयामास महीमण्डलम्। सायनवृश्चिकस्य सप्तदशांशोऽस्य जन्म। जन्मकाले ग्रहाणां सायन-स्पष्टानि—रवेः—कन्यायाः ५, चन्द्रस्य—मीनस्य १२, मङ्गलस्य—मकरस्य ३३, बुधस्य—सिंहस्य २९, गुरोः (वक्रिणः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—मीनस्य २६, शुक्रस्य—कन्यायाः २६१, शनेः—वृश्चिकस्य १५, राहोः—मकरस्य १७, हार्शेलस्य (चक्रिणः)—कुम्भस्य १९, नेपुच-नस्य—कर्कटस्य २४१, भावस्फुटानि सायनानि—१—वृश्चिकस्य १७, २—धनुषः २८, ३—मकरस्य २५, १०—कन्यायाः ५, ११—तुलायाः ६, १२—तुलायाः २९।

ख्रिस्तीय-१८३१-संवत्सरे मार्चमासस्य द्वाविंशे दिवसे (March 22nd, 1831) दिवा द्विप्रहरादनन्तरं सरस्वत्याः प्रियतनयोऽयं मातुः सकाशं प्रचलितः। केवलं मासद्वयात् पूर्वं (January, 1832) महाकविना स्वग्रन्थमुक्तावल्या मध्यमणिः फाउष्टनाटकं समाप्तिमनायि। इह खलु महाकवयो ब्रह्मानन्दसहोदरमानन्दसन्दोहमितराननुभावयन् स्वयं चानुभवञ्जरामपि जयन् मरणमप्यविगणयन् प्रायेणान्तिमकालपर्यन्तं कर्मभूमौ कर्मैव समाचरन्ति। अस्माकं रवीन्द्रनाथोऽप्यत्र निदर्शनम्। अत एवोक्तं महाकविना लंफेलो (Longfellow) महोदयेन —

Ah, nothing is too late
Till the tired heart shall cease to palpitate.
Cato learned Greek at eighty......
Chaucer, at Woodstock with the nightingales,
At sixty wrote the Canterbury Tales.
Goethe at Weimar, toiling to the last,
Completed Faust when eighty years were past.
Age is opportunity no less
Than youth itself, though in another dress.
And as the evening twilight fades away
The sky is filled with stars invisible by day.

(LONGFELLOW, *Morituri Salutamus.*)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसीच्चास्य महाकवेः फलितज्योतिषशास्त्रे निरतिशया श्रद्धा। अष्टवर्षदेशीयेनामुना माता सनिर्बन्धं पृष्टा—अम्ब ! मम जन्मनि ग्रहैर्यानि फलानि प्रतिश्रुतानि तानि दास्यन्ते वा न वेति। मात्रोक्तम्—वत्स ! इतरे तावज्जना ग्रहाणां साहायकमन्तरेणैव स्वकर्म सुष्ठु निर्वाहयन्ति, किमिति त्वं ग्रहाणामानुकूल्यमपेक्षसे इति। भविष्यस्य कविप्रजापतेर्वदनारविन्दात् तदात्व एव विनिःसृता वाणी—अपरे येन तुष्यन्ति न खलु मम तेन सन्तोष इति।

किप्लिङ्-प्रभृतयः कविप्रकाण्डाः—

East is East and West is West and never the twain shall meet.

"प्राच्येव प्राची प्रतीच्येव प्रतीची, न खलु तयोर्मेलनं कदापि कथञ्चिदपि सम्भवति" इति वदन्तः प्राच्यं विज्ञानप्रकर्षमवज्ञोपहतं विदधति, अनेन पुनः कविकुलचूडामणिना सभक्त्युन्मेषं कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलमधीतं संस्तुतं च।

भाइमार (Weimar) नगरे संरक्षितानि महाकवेर्हस्तलिखितानि पुस्तकान्यपि तस्य कालिदासानुवर्तित्वं विस्पष्टमेव प्रमाणयति, तस्य सर्वस्वस्य Faust नाटकस्य चांशविशेषस्य विपरिवर्तनं शकुन्तलाध्ययनसम्भूतमिति।*

महाकवेरस्य सम्राजा नैपोलियनेन साकं साक्षात्कारवृत्तान्तः

---

* "What is not so well-known, however, is that it has now been proved from the manuscripts at Weimar, that Goethe made an important alteration, in his own masterpiece, Faust, in consequence of reading it". (E. H. ROOKE, *Meghadūta*, vii.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविप्रवरेण बाणभट्टेन सार्कं सम्राजः श्रीहर्षदेवस्य प्राथमिकं साक्षात्कारं संस्मारयति। १८०८-तमे ख्रिस्तीये संवत्सरे अक्टोबर-मासस्य द्वितीये दिवसे (2nd October ,1808) सम्राजा समाहूतो महाकविस्तत्समीपमनुप्राप्तः प्रथमदर्शन एवोक्तः—त्वं खलु पुरुष इति। दीर्घां होरामेकां सम्राजा कृतसंवादः कविप्रवरो यदा विनिर्गतस्तदा नेपोलियनेनोक्तम्—असौ तावत् पुरुष इति। षष्टिवर्षस्य पुरुषस्य शरीरसौष्ठवं विलोक्यैवमुक्तम् अथवा तस्य मुखे परिस्फुरन्तं प्रतिभाविलासं प्रत्यक्षीकृत्यैवमुक्तं न विज्ञायते *। परं वचनमिदं भारवीयां सूक्तिं स्मारयति—

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरः स्थिते।
नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः॥

(किरातार्जुनीय ११।६२)

कृतं पुरुषशब्देन जातिमात्रावलम्बिना।
योऽङ्गीकृतगुणैः श्लाघ्यैः सविस्मयमुदाहृतः॥

(किरातार्जुनीय ११।७२)

इति।

कविप्रवरस्य बाणभट्टस्य पुनर्नासीत् प्रथमत एवंविधः सौभाग्य-विलासः। सम्राजः श्रीहर्षदेवस्य भ्रात्रा गुणैकपक्षपातिना कृष्णेन

* On October 2nd Goethe was summoned to Napoleon's presence. The Emperor was breakfasting, Talleyrand stood by him. When Napoleon looked up, he seems to have been surprised and impressed by the splendid appearance that Goethe still preserved. "You are a man" [Vous etes un homme] he exclaimed... They talked of the drama...and parted in mutual admiration. "There's a man for you" [Voila un homme], Napoleon said to Daru. JOSEPH MCCABE *Goethe*, p. 317.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाहूतो भट्टबाणो यदा श्रीहर्षस्य समीपे सप्रश्रयमागतस्तदा महनीयेन सम्राजोक्तम्—महानयं भुजङ्ग इति। तच्छ्रुत्वा मर्मणीव समाहतेन कविनोक्तम्—देव ! अविज्ञाततत्त्व इव, अश्रद्दधान इव, नेय इव, अविदितलोकवृत्तान्त इव च कस्मादेवमाज्ञापयसि ? स्वैरिणो विचित्राश्च लोकस्य स्वभावाः प्रवादाश्च। महद्भिस्तु यथार्थदर्शिभिर्भवितव्यम्। नार्हसि मामन्यथा सम्भावयितुमविशिष्टमिव। ब्राह्मणोऽस्मि जातः सोमपायिनां वंशे वात्स्यायनानाम्। यथाकालमुपनयनादयः कृताः संस्काराः। सम्यक् पठितः साङ्गो वेदः। श्रुतानि यथाशक्ति शास्त्राणि। दारपरिग्रहादभ्यागारिकोऽस्मि। का मे भुजङ्गता। लोकद्वयाविरोधिभिस्तु चापलैः शैशवमशून्यमासीत्। अत्रानपलापोऽस्मि। अनेनैव च गृहीतविप्रतीसारमिव मे हृदयम्" इत्यादि। "आकर्णितबाणवचनश्च देवो हर्षः प्रतीत्यानुपपन्नतामात्मनो वचनस्य, सूचयन्निव चारूढमूलतामात्मनो मनसि प्रवादस्यास्य, "एवमस्माभिः श्रुतम्" इत्यभिधाय तूष्णीमासीत्। सोऽयं प्राथमिकहर्षसाक्षात्कारवृत्तान्तः श्रीमतो बाणस्य। अतः परं च क्रमशः समुपचित्तसौहार्दः शनैः शनैर्गरीयस एव प्रेम्ण आस्पदीभूतोऽपरमिव हृदयमेष संवृत्तः श्रीमतो हर्षस्य।"

श्रीहर्षोच्चारितो भुजङ्गशब्दश्च गेटेमधिकृत्य हार्डारेण प्रयुक्तं चटकशब्दं संस्मारयति। तथाहि १७७२-मितस्य ख्रिस्तीयसंवत्सरस्य फेब्रुयारीमासे हार्डारकविना पत्न्याः सविधे विलिखितम्—गेटे तावत् परमार्थतः सज्जन एव, केवलं कथञ्चिल्लघुचित्तः चटकप्रकृतिश्च। गेटेकवेर्जीवनवृत्तान्तप्रणेत्रा Lewes-महोदयेन चटकप्रकृतिशब्दस्य को वार्थ इति पृष्टैस्तैस्तैः शार्मण्यैर्विभिन्नान्येवोत्तराणि प्रदत्तानि। केनचिदुक्तम्—चटक इव वाचाटः, अपरेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनश्चटक इव साहसिकः, इतरेण चटक इव कुतूहली अन्येन चटक इव कामुक इति* ।

"समधिक आलोकः" इति पदद्वयं समुच्चार्य गेटे-कविर्महोनिद्रामभजत इति बहुभिराख्यायते। एतच्च महाकवेर्वचनं प्राचीनार्याणाम्—तमसो मा ज्योतिर्गमय (बृहदारण्यकोपनिषत् १।३।३०) इति प्रार्थनं संस्मारयति । †

वर्षेऽस्मिन् युरोपप्रदेशे गेटेमहोदयस्य कौस्तुभजयन्तीमहोत्सवोऽनुष्ठीयते। अस्माभिरपि कविप्रजापतेः स्मरणाय तस्य काव्यादिगतानि सुभाषितानि वाचकमहाभागेभ्यः समुपह्रियन्ते। तेषु च सर्वथा शकुन्तलोपश्लोकनं प्राथम्यमर्हति । (क्रमशः)

* (Herder says) in a letter to his bride, dated February 1772 :—Goethe is realy a good fellow, only somewhat light and *sparrow*-like. The author Lewes says in a footnote : "*Nur etwas leicht und spatzenmaessig* : I translate the phrase leaving the reader to interpet it, for twenty Germans have given twenty different meanings to the word "sparrow-like," some referring to the chattering of sparrows, others to the boldness of sparrows, others to the curiosity of sparrows, and others to the libertine character of sparrows. Whether Herder meant gay, volatile, forward, careless, or amorous, I cannot decide. LEWES, *The story of Goethe's life*, pp.62-63 and foot-note.

† "The last words audible were : "More light !" The final Darknes grew apace, and he whose eternal longing had been for more Light, gave a parting cry for it as he was passing under the shadow of Death." (Lewes)

"Whether his last words were "More light !" is doubtful ; if so, they were a simple direction to his servant to open the second shutter." (Atkins)

" "Shortly afterwards he said to his servant : "Open the second shutter also, so that we may have more light." It is from this sentence that the cry "More light" has been taken by those who would make it symbolical. His physician says that these were his last words, though others say that he asked afterwards for Ottilie's hand." (McCabe).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक-परिचयः ।

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

Everybody's Guide to King's English By R. Johnston Martin. Published by D. P. Taraporevala Sons & Co. 210 Hornby Road, Fort, Bombay. Price : Rs. 2/14/-.

बहोः कालात् पूर्वं भगवता वार्ष्यायणिना जन्मास्तित्वविपरिणमनवर्धनापक्षयविनाशरूपाः षड् भावविकाराः प्रतिपादिताः। भाषाणामपि भावेष्वन्तर्भूतत्वान्निखिलास्वपि भाषास्वेते विकारा उपलभ्यन्ते। न खलु जगति कापि भाषैकरूपतयावतिष्ठते, स्वल्पेन वा महता वा कालेन तस्या विपरिणामो ध्रुव एव। परं विकारो नियत इति न खलु चरणतलेनावमर्द्य शिष्टप्रयोगान् यथाभिलषितं येन केनापि शब्देन व्यवहर्तव्यम्। अत एवोक्तं शास्त्रकारैः— एकः शब्दः सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके कामधुग् भवतीति। ये तावदाङ्ला वा वैदेशिका वाङ्लशब्दानां सम्यग् ज्ञानाय प्रयतन्ते तेषामतिमात्रमुपकरिष्यत्ययं ग्रन्थ इत्यत्र नास्ति संशयलेशोऽपि।

"अत्रत्य उपोद्घाते Decline of the English Language (आङ्लभाषाया अपक्षयः) इत्याख्याद् ग्रन्थादुद्धृतम्—

"ग्रीष्मसरिद्सलिलायं विलीनं साम्प्रतं सौष्ठवञ्च प्रसादश्च, केवलं युक्तीनां दारिद्र्यं समाच्छादयितुं शब्दानामतिबाहुल्यं सर्वत्र विराजते। शब्दाश्चेमे न खल्वर्थगाम्भीर्यानुरोधेन न वा शिष्टप्रयोगानुसारेणोपादीयन्ते, केवलमद्भुता इति अप्रचलिता इति वा प्रयुज्यन्ते। निरतिशयातिशयोक्तिप्रियता, वैदेशिकशब्दबाहुल्यम्, अप्रचलितेषु ग्राम्येषु च पदेषु पदकदम्बकेषु चात्यासक्तिः, क्लिष्टोपमारूपकप्रियता, सुप्रचलित-सुसङ्गत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दानां परिजिहीर्षया नवनवाद्भुतशब्द-निर्माणव्यसनम्—साम्प्रतिकमेतत् सर्वम् आवश्यकज्ञानप्रचारव्यपदेशेन भाषां दूषयति" इति ।

अत्र च ग्रन्थे व्युत्पित्सूनामधिगतविद्यानां चाङ्लव्याकरणगतानां संशयानां समुच्छेदनाय, शब्दानां च यथार्थार्थप्रतिपादनाय सुमहान् प्रयास आस्थितः । अत्रत्या च सरला, सुबोधा च भङ्गिः पाठसमकालमेव सर्वमवबोधयति पठितारम् ।

१५ पृष्ठे I had no other alternative इत्येतस्याशुद्धत्वं प्रतिपादितम्, alternative इत्यत्रान्तर्भूतस्य alter-शब्दस्यैव लाटिन्-भाषायाम् अन्यार्थत्वात् । संस्कृतग्रन्थेष्वन्तरान्तरा 'अन्यदुपायान्तरं नास्ति' इत्येवंजातीयाः प्रयोगा उपलभ्यन्ते * । तेषामप्यनुकरणं सर्वथा न समीचीनम् ।

तस्मिन्नेव पृष्ठे उक्तम्—यद्यपि alternative-शब्दस्यार्थः द्वयोरन्यतरः पक्षस्तथापि 'बहूनामन्यतमः पक्षः' इत्यर्थेऽप्ययं प्रयुज्यतेऽभियुक्तैः । तथाच Gladstone-महोदयस्य प्रयोगः—My decided preference is for the fourth and last of these alternatives. एतच्च वङ्गभाषायां "सोनार पाथरबाटी" (स्वर्णनिर्मितं प्रस्तरपात्रम्) इति व्यपदिश्यते ।

विंशे पृष्ठे another from इत्यस्य निकृष्टत्वं प्रतिपादितम्, परमेतस्योद्भवकारणं न विवृतम् । यथास्माभिर्दृश्यते तथा "different from" "another than" इत्यतयोः सङ्करेण another from सम्भूतम् ।

---

* एतस्य हेतोरेतस्मात् कारणाद् ध्यानमेवोद्गीथमुपासीत, नान्यद्वृत्तत्यरम् । छान्दोग्योपनिषद्भाष्य १।३।५ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111127 गुरुकुल कांगड़ी

त्रिंशे पृष्ठे वर्णितम्—यद्यपि पुरस्तादित्यर्थे in front of समीचीनम्, तथापि पश्चादित्यर्थे in back of नैव प्रयोज्यम्, behind इति वा at the back of इति वा प्रयोगमर्हति इति। शिष्टप्रयोग एवात्र नियामकः।

निःसन्देहमित्यर्थे "beyond a doubt" "beyond a question" इत्यनयोरशुभसंयोगेन beyond a question of doubt इति निष्पन्नम्। एतच्चातिशयोक्तिप्रियता-निबन्धनम्, सर्वथा त्याज्यमेव।

एवमेव "blame one" "put the blame on one" इत्यनयोः सङ्करेण blame on one निष्पन्नम्। तथाहि He tried to blame it on me गरीयसा ग्राम्यतादोषेण दुष्टम्।

सर्वास्वेव भाषासु विपरीतार्थ-प्रतिपादकाः शब्दाः केचन समुपलभ्यन्ते। तथाहि यदास्माभिः certain number इत्युच्यते तदा uncertain figure इति बोध्यते। There is a certain number of people in the room इत्युक्तौ प्रतीयते कति जना गृहे स्थिता इति सम्यङ् न ज्ञायते इति।

समानन्यायेन quite-शब्दस्यार्थः not quite इति। "Actually the word "quite" moderates the sense of a sentence. Note the difference between :

This is a good book.
This is quite a good book.

४९ पृष्ठे दृश्यते—

When our comparison involves the detailed setting forth of similarities, we "compare with", as for example, "Let us compare the merits of your instrument with mine."

अत्र यस्तावद् वाक्यस्य शुद्धाकारः प्रदर्शितः स एवाशुद्ध इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिभाति। वयं तावद् भारतीयाः, न खल्वाङ्लभाषास्माकं मातृभाषा, तथापि यथास्माभिर्दृश्यते तथा Let us compare the merits of your instrument *with those of* mine इत्येव शुद्धमिति प्रतिभाति। न खलु 'तव यन्त्राणां गुणा मया सह तुलनीयाः', तव यन्त्राणां गुणा मम यन्त्राणां गुणैः साकं तुलनीया इत्येव वक्तुरभिप्राय इति।

५० पृष्ठे "comprise" "consist of" इत्यनयोः सङ्करेण comprise of इत्यस्योत्पत्तिः प्रदर्शिता।

बहुभिर्भारतीयैः "consider" "regard as" इत्यनयोः सङ्करेण consider as प्रयुज्यते, तस्याशुद्धत्वं ५२ पृष्ठे प्रतिपादितम्।

५४ पृष्ठे—There was an accident just outside the house, but John continued to read on इति वाक्ये on इति निपातस्यावकरत्वं प्रदर्शितम्, मन्ये बाहुल्यभिया प्रमादस्यास्योत्पत्तिप्रकारो नाभिव्यञ्जितः। यथास्माभिर्दृश्यते तथा continued + went on = continued on.

६४ पृष्ठे It is doubtful *whether* John will come today इत्येतस्य शुद्धाकारः प्रदर्शितः It is doubtful *that* John will come today. एतत्तु Fowler-महोदयो नानुमन्यते। तन्मतेन It is doubtful *whether* John will come today इति वचनं सुसमीचीनमेव।

६६पृष्ठे "other than" "else but" इत्यनयोः सङ्करेण सञ्जातस्य other but इत्यस्याशुद्धत्वं वर्णितम।

८२ पृष्ठे After that the full moon grows smaller इत्यस्यायौक्तिकत्वं प्रतिपादितम्। आधिक्यं हि grow इत्यस्यार्थः न्यूनतयाधिकीभवतीति च विप्रतिषिद्धम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८५ पृष्ठे "no sooner...than" "hardly...when" इत्येतयोः सङ्करेण समुत्पन्नस्य hardly...than इत्येतस्याशुद्धत्वं प्रदर्शितम् ।

एवञ्च बहुविधज्ञातव्यविषयविभूषितोऽयं ग्रन्थोऽवश्यमेव संग्राह्यश्चानुशीलनीयश्च भाषानुरागिभिरिति शम् ।

सप्रमोदाङ्गीकारः

सप्रमोदं सबहुमानं सधन्यवादं स्वीक्रियन्ते—

देवभाषायाम्

(१) ऋग्वेदसंहिता सायणभाष्यविभूषिता । (नवम-दशम-मण्डल-खिल-परिशिष्टाद्यात्मकश्चतुर्थो भागः ।) पुण्यपत्तनस्थ-वैदिकसंशोधनमण्डलतः प्रकाशिता । (Vaidik Samsodhana Mandala, Poona 2) मूल्यं पञ्चविंशती रूपकाः ।

सुविशुद्धः सुसम्पादितश्चायं ग्रन्थोऽवश्यमेव संग्राह्यो विद्वद्भिः ।

(२) मोरालहरी । पण्डितवर्यया सौभाग्यवत्या क्षमा राव महोदयया वैदर्भ्या रीत्या संग्रथितं निर्णयसागरयन्त्रालये मुद्रितं बहिरन्तःस्फुरद्रसं नितरां नयनमनोहारि सव्याख्यानं खण्डकाव्यम् । ३७ न्यू मेरिन् लाइनस्, मुम्बापुरीतः (37 New Marine Lines, Bombay) प्रकाशितम् । मूल्यं सार्द्धरूप्यकद्वयमात्रम् ।

कविना, विदुषा, भक्तेन, धार्मिकेण, शिक्षकेण, छात्रेण—सर्वेणैवावश्यं संग्राह्येयं लहरी ।

(३) रसमाधुरी । ओट्टूर उण्णिणम्पूतिरिप्पाट् कविवर्येण संग्रथितः सुमधुराणां खण्डकाव्यानां संग्रहः । श्रीशिवपुरस्थे मङ्गलोदयमुद्रालये मुद्रापितोऽयं प्रबन्धोऽवश्यं संग्राह्यो रसिकैः । मूल्यं रूप्यकमात्रम् । (Mangaloday Press, Trichur, S. I.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वङ्गभाषायाम्

(३) लघुपाराशरीरहस्य। आचार्य-श्रीराजेन्द्रनाथशास्त्रि-विरचितो लघुपाराशरीखण्डनात्मको वङ्गभाषामयः प्रबन्धः। सत्यव्रत लाईब्रेरी, १९७ कर्णओयालिस् ष्ट्रीट्, कलिकाता इत्यतः प्रकाशितमिदं रहस्यम्। मूल्यं रूप्यकचतुष्टयम्।

(४) दस्युर पश्चाते (दस्योरनुपदम्) श्रीकृष्णगोपालभट्टाचार्य-काव्यतीर्थ एम् ए, एम् बी विरचितमतिमात्रं कौतूहलोद्दीपकमुपाख्यानम् (detective novel). ४४ सी बागबाजार ष्ट्रीट, (44 C, Baghbazar Street, Calcutta 3) कलिकाता, इत्यतः प्रकाशितम्। मूल्यं रूप्यकद्वितयमात्रम्।

हिन्दीभाषायाम्

(५) आचार्यपाणिनिके समय विद्यमान संस्कृतवाङ्मय। पण्डितवर्येण युधिष्ठिरमीमांसकेन सन्दृब्धोऽयं सुसमीचीनः प्रबन्धः आर्य साहित्य मण्डल लिः अजमेर इत्यतः प्राप्तव्यः। मूल्यम् आणकषट्कमात्रम्।

सति सम्भवे ग्रन्थानामेषां विस्तरेण समालोचना प्रकाशयिष्यते। ऋग्वेदसंहिताया मीरालहर्य्याश्च समालोचनमागामिन्यां संख्यायां विधास्यते।

पृच्छा

२। मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

इति पद्ये को वालङ्कारः—दृष्टान्तो वा प्रतिवस्तूपमा वा ?

जिज्ञासुः। कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কলিকাতা বিশ্ববিদ্যালয়ের অধ্যাপক

শ্রীক্ষিতীশচন্দ্র চট্টোপাধ্যায়, এম. এ. ডি. লিট্ প্রণীত

শব্দ-কথা

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে। **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া,** বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোত-শব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম ত'র পর আছে, না দ্বিতীয় ত'র পর আছে, না উভয় ত'র পর আছে, সঠিক শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, চন্দ্রমাঃ, পূর্ণিমা ও অমাবস্যা শব্দের ব্যুৎপত্তি কি, লাবণ্যলালিম মুখমণ্ডল কমনীয় কিনা, অনীতা, নমিতা, ইভা, জিগেন্দ্র প্রভৃতি নামগুলির অর্থ কি প্রভৃতি নানা বিষয় আলোচিত হইয়াছে। সোনার পাথর বাটী প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী, গ্রীক্, লাটিন্, জার্মান প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। সন্ধির কথায় সন্ধির বৈজ্ঞানিক ব্যাখ্যা ইংরাজী, লাটিন ও আরবী ভাষায় সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব, ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে। বাঙ্গালা, ইংরাজী ও সংস্কৃত ভাষায় অধ্যাপক ও ছাত্র, সাহিত্যিক, সাংবাদিক প্রভৃতির পক্ষে এই গ্রন্থ অত্যাবশ্যক।

মূল্য দুই টাকা মাত্র

ঊষার আলো

ইহাতে দেশ-বিদেশে প্রচলিত হাস্যরসাত্মক কৌতূহলোদ্দীপক অথচ শিক্ষাপ্রদ শতাধিক ছোট গল্প সন্নিবিষ্ট হইয়াছে। পড়িতে পড়িতে হাসিয়া অস্থির হইতে হইবে। **মূল্য বার আনা মাত্র**

নক্ষত্রমালা। শ্রেষ্ঠ শ্লোকসমষ্টি, ব্যাখ্যা ও অনুবাদ। মূল্য পাঁচ আনা মাত্র

শ্রীবিশ্বনাথ চট্টোপাধ্যায়

৮১নং নিউ শ্যামবাজার ষ্ট্রীট, কলিকাতা—৪।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 2232

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;

Formerly Editor, Calcutta Oriental Journal,

Surabharati, Oriental Literary Digest, etc., etc.

It is a unique work dealing with and throwing a flood of light on the technical terms found in the Nirukta, different Pratis'ākhyas and Pāṇini, Kātantra, Candra, Jainendra, S'ākaṭāyana, Hemacandra, Saṃkṣhiptasāra, Mughdabodha, Sārasvata, Supadma, Prayogratnamālā and Harināmāmṛita systems of Sanskrit Grammar.

It offers for the first time rational explanations of even such apparently meaningless terms as laṭ, ghi, ghuṭ, bha..

It gives reasons for the use of particular letters as Anubandhas by Pāṇini and his successors.

It contains many charming poems about these technical terms with their English translations.

No serious student or teacher of Sanskrit or Philology can afford to do without the book.

The book is priced at Rupees Ten and will be sent per Regd. Post on receipt of Rs. 10/8/- (Foreign Rs. 12/8/-) by Money Order.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4.

Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press, 63, Beadon Street, Calcutta—6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

111127

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri